# श्री आदिशङ्कराचार्य पूजाविधि



# ॥ श्रीशङ्करभगवत्पाद पूजाविधिः ॥

*[भस्म - रुद्राक्षधारी उदङ्मुखः पूजोपकरणानि संभृत्य पूजामारभेत् ]*

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।

यः स्मरेत्पुण्डरीकाक्षं स बाह्याभन्तरः शुचिः ॥

*[आचम्य]*

ॐ ध्रु॒वं ते॒ राजा॒ वरु॑णो ध्रु॒वं दे॒वो बृह॒स्पतिः॑ । ध्रु॒वन्त॒ इन्द्र॑श्चा॒ग्निश्च॑ रा॒ष्ट्रं धा॑रयतां ध्रु॒वम् ॥

नमो ब्रह्मण्यदेव्याय गोब्राह्मणहिताय च ।

जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुदेवो महेश्वरः ।

गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।

लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ॥

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।

द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।

सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।

सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।

देवतापूजनार्थाय घण्टानादं करोम्यहम् ॥ *[इति घण्टानादं कृत्वा]*

## *भूतोत्सारणम्*

अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।

ये भूता विघ्नकर्तारः ते नश्श्यन्तु शिवाज्ञया ॥

अपक्रामन्तु भूतानि पिशाचास्सर्वतो दिशम्।

सर्वेषामविरोधेन पूजाकर्म समारभे ॥

## *आसनविधिः*

आसनमहामन्त्रस्य पृथिव्या मेरुपृष्ठः ऋषिः कूर्मो देवता

सुतलं छंदः आसने विनियोगः ॥

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।

त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

*[मनुष्यगन्ध निवारणार्थं येभ्यो मातेति मन्त्रं जपेत्]*

ॐ येभ्यों मा॒ता मधु॑म॒त्पिन्व॑ते॒ पयः॑ पी॒यूषं॒ द्यौरदि॑ति॒रद्रिं॑ बर्हाः । उ॒क्थ शुं॒ष्मान् वृष॒भरान्त्स्वप्नं॑ स॒स्ताः॰ आदि॒त्याः॰ अनु॑मदा स्व॒स्तये॑ । ए॒वा पि॒त्रे वि॒श्वदे॑वाय॒ वृष्णे य॒ज्ञैर्वि॑धेम॒ नम॑सा ह॒विर्भिः॑ । बृह॑स्पते सु॒प्र॒जा वी॒रव॑न्तो व॒यं स्या॑म॒ पत॑यो र॒यी॒णाम् ॥

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।

प्रसन्नवदनं ध्यायेत् सर्वविघ्नोऽपशान्तये ॥

*[प्राणानायम्य]*

*[देशकालौ संकीर्त्य]*

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं अस्माकं सकुटुंबानां क्षेम स्थैर्य विजय वीर्य अयुरारोग्यैश्वर्याभिवृद्ध्यर्थं सर्वारिष्टशान्त्यर्थं सर्वाभीष्टसिद्ध्यर्थं श्रीशङ्करभगवत्पाद प्रसाद सिद्ध्यर्थं श्रीशङ्कराचार्य चरणारविन्दयोः अचञ्चल निष्काम निष्कपट भक्तिसिद्ध्यर्थं यथाशक्ति ध्यानावाहनादि षोडशैरुपचारैः श्रीमच्छङ्करभगवत्पाद पूजां करिष्ये ॥
तदङ्गत्वेन कलश - शंख - आत्म - पीठ पूजां च करिष्ये ॥

# *कलशार्चनम्*

श्रीकलशाय नमः । दिव्यगन्धान्धारयामि ॥

*[कलशं गन्धाक्षत पत्र पुष्पैरभ्यर्च्य परिमलद्रव्याणि निक्षिप्य कलशं हस्तेनाच्छाद्य ]*

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।

मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।

ऋग्वेदोऽथयजुर्वेदः सामवेदोऽप्यथर्वणः ॥

अङ्गैश्च सहिताः सर्वे कलशाम्बु समाश्रिताः ।

गायत्री चात्र सावित्री शान्तिः पुष्टिकरी तथा ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।

नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः ।

आयान्तु गुरुपूजार्थं दुरितक्षयकारकाः ॥

ॐ आपो॒ वा इ॒दꣳ सर्वं॒ विश्वा॑ भू॒तान्याप॑: । प्रा॒णा वा आपः प॒शव॒ आपोऽन्न॒मापोऽमृ॑त॒माप॑स्स॒म्राडापो॑
वि॒राडाप॑स्स्व॒राडाप॒श्छंदा॒ꣳस्यापो॒ ज्योती॒ꣳष्यापो॒ यजू॒ꣳष्याप॑स्स॒त्यमाप॒स्सर्वा॑ दे॒वता॒
आपो॒ भूर्भुव॒स्सुव॒राप॒ ॐ ॥
ॐ इ॒मं मे॑ गङ्गे यमुने सरस्वति॒ शुतु॑द्रि स्तोमꣳ[1] सचता॒परु॒ष्णिया अ॒सि॒क्नि॒या म॑रुद्वृधे वि॒तस्त॒यार्जी॑कीये
शृणु॒ह्या सुषोम॑या ॥

सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्राम् ।

करधृतकलशोद्यत्सोत्पलाभीत्यभीष्टाम् ॥

विधिहरिहररूपां सेन्दुकोटीरचूडाम् ।

कलितसितदुकूलां जाह्नवीं तां नमामि ॥

*[गायत्र्या दक्षिणामूर्तिमूलेन च दशवारमभिमन्त्र्य - कलशमुखे पुष्पाणि निक्षिप्य - कलशोदकेन आत्मानं*

*सर्वोपकरणानि च प्रोक्षयेत् ]*

# *शंखपूजा*

*[कलशोदकेन भूर्भुवस्सुवरोऽमिति शंखं प्रक्षाळ्य - चक्रमुद्रां प्रदर्श्य - गायत्र्या दक्षिणामूर्तिमूलेन च शंखं कलशजलेनापूर्य - धेनुमुद्रां प्रदर्श्य – परिमलद्रव्याणि निक्षिप्य - गन्धाक्षतपत्रपुष्पैः समभ्यर्चयेत् ]*

शंखमूले ब्रह्मणे नमः ।

शंखमध्ये जनार्दनाय नमः ।

शंखाग्रे चन्द्रशेखराय नमः ॥

*[शंखं स्पृष्ट्वा]*

शंखं चन्द्रार्कदैवत्यं मध्ये वरुणसंयुतम् ।

पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती ॥

त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ।

शंखे तिष्ठन्ति विप्रेन्द्राः तस्माच्छंखं प्रपूजयेत् ॥

त्वं पुरा सागरोत्पन्नः विष्णुना विधृतः करे ।

पूजितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तुते ॥

गर्भा देवारिनारीणां विशीर्यन्ते सहस्रधा ।

तव नादेन पाताले पाञ्चजन्य नमोऽस्तुते ॥

दर्शनादेव शंखस्य किं पुनः स्पर्शनेन तु ।

विलयं यान्ति पापानि हिमवद्भास्करोदये ॥

नत्वा शंखं करे स्पृष्ट्वा मन्त्रैरेतस्तु वैष्णवैः ।

यः स्नापयति गोविन्दं तस्य पुण्यमनन्तकम् ॥

शंखमध्यस्थितं तोयं भ्रामितं केशवोपरि ।

अङ्गलग्नं मनुष्याणां ब्रह्महत्यायुतं दहेत् ॥

ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि तन्नः शंखः प्रचोदयात् ॥

*[इति शंखगायत्रीं दशवारं जपित्वा - शंखोदकेन किञ्चित् कलशे निक्षिप्य - देवस्यार्घ्यं दत्वा - शंखोदकेन पूजाद्रव्याणि आत्मानं च प्रोक्ष्य - शेषं विसृज्य – पुनः शंखमापूर्य - गन्धादिभिरभ्यर्च्य - देवस्य दक्षिणदिग्भागे स्थापयेत्]*

## *श्रीमहागणपति पूजा*

आदौ निर्विघ्नता सिद्ध्यर्थं श्रीमहागणपतिपूजां करिष्ये ॥

ॐ गणानां᳚ त्वा ग॒णप॑तिꣳ हवामहे क॒विं क॑वी॒नामु॑प॒मश्र॑वस्तमम् । ज्ये॒ष्ठ॒राजं॒ ब्रह्म॑णां ब्रह्मणस्पत॒ आनः॑ शृ॒ण्वन्नू॒तिभि॑स्सीद॒ साद॑नम् ॥

श्रीमहागणपतये नमः - ध्यायामि । ध्यानं समर्पयामि ॥

श्रीमहागणपतये नमः - अवाहयामि ।

श्रीमहागणपतये नमः - आसनं कल्पयामि ।

श्रीमहागणपतये नमः - पादारविन्दयोः पाद्यं पाद्यं समर्पयामि ।

श्रीमहागणपतये नमः - हस्तेषु अर्घ्यमर्घ्यं समर्पयामि ।

श्रीमहागणपतये नमः - मुखारविन्दे आचमनीयमाचमनीयं समर्पयामि ।

श्रीमहागणपतये नमः - मलापकर्षणस्नानं समर्पयामि ।

श्रीमहागणपतये नमः - फलपञ्चामृतस्नानं समर्पयामि ।

श्रीमहागणपतये नमः - शुद्धोदकस्नानं समर्पयामि ।

श्रीमहागणपतये नमः – स्नानाङ्गमाचमनीयमाचमनीयं समर्पयामि ।

श्रीमहागणपतये नमः - वस्त्रयुग्मं समर्पयामि ।

श्रीमहागणपतये नमः - आचमनीयमाचमनीयं समर्पयामि ।

श्रीमहागणपतये नमः - यज्ञोपवीतं समर्पयामि ।

श्रीमहागणपतये नमः - आचमनीयमाचमनीयं समर्पयामि ।

श्रीमहागणपतये नमः - आभरणानि समर्पयामि ।

श्रीमहागणपतये नमः - दिव्यगन्धान्धारयामि ।

श्रीमहागणपतये नमः - अक्षतान् समर्पयामि ।

## *॥अथ श्रीमहागणपति नामपूजा ॥*

ॐ सुमुखाय नमः ।

ॐ एकदन्ताय नमः ।

ॐ कपिलाय नमः ।

ॐ गजकर्णकाय नमः ।

ॐ लम्बोदराय नमः ।

ॐ विकटाय नमः ।

ॐ विघ्नराजाय नमः ।

ॐ गणाधिपाय नमः ।

ॐ धूम्रकेतवे नमः ।

ॐ गणाध्यक्षाय नमः ।

ॐ फालचन्द्राय नमः ।

ॐ गजाननाय नमः ।

श्रीमहागणपतये नमः - नानाविध परिमलपत्रपुष्पाणि समर्पयामि ॥

श्रीमहागणपतये नमः - धूपमाघ्रापयामि ।

श्रीमहागणपतये नमः - दीपं दर्शयामि ।

श्रीमहागणपतये नमः – धूपदीपानन्तरं आचमनीयमाचमनीयं समर्पयामि ।

श्रीमहागणपतये नमः - अमृतनैवेद्यं समर्पयामि ।

श्रीमहागणपतये नमः - ताम्बूलं समर्पयामि ।

श्रीमहागणपतये नमः - दिव्यमङ्गलनीराजनं दर्शयामि ।

ॐ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु

लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमो नमः ॥

श्रीमहागणपतये नमः - मन्त्रपुष्पं समर्पयामि ॥

श्रीमहागणपतये नमः - प्रदक्षिणनमस्कारान् समर्पयामि ।

श्रीमहागणपतये नमः - प्रसन्नार्घ्यं समर्पयामि ।

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।

निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

श्रीमहागणपतये नमः - प्रार्थयामि ।

श्रीमहागणपतये नमः - समस्तोपचारपूजाः समर्पयामि ।

अनया पूजया श्रीमहागणपतिः प्रीयताम् ॥

## *आत्मपूजा*

आत्मने नमः - दिव्यगन्धान् धारयामि ॥

आत्मने नमः ।

अन्तरात्मने नमः ।

जीवात्मने नमः ।

योगात्मने नमः ।

परमात्मने नमः ।

ज्ञानात्मने नमः - समस्तोपचारान् समर्पयामि ॥

देहो देवालयः प्रोक्तः जीवो देवः सनातनः ।

त्यजेदज्ञाननिर्माल्यं सोऽहं भावेन पूजयेत् ॥

आराधयामि मणिसन्निभमात्मलिङ्गं मायापुरीहृदयपङ्कजसन्निविष्टम् ।

श्रद्धानदीविमलचित्तजलाभिषेकैः नित्यं समाधिकुसुमैरपुनर्भवाय ॥

## *मण्टपध्यानम्*

उत्तप्तोज्ज्वलकाञ्चनेन रचितं तुङ्गाङ्गरङ्गस्थलम् ।

शुद्धस्फाटिकभित्तिकाविरचितैः स्तम्भैश्च हेमैश्शुभैः ॥

द्वारैश्चामररत्नराजखचितैः वज्रैश्च सोपानकैः ।

नानारत्नविचित्रस्वर्णकलशैः ध्यायेन्महामण्टपम् ॥

## *द्वारदेवता पूजा*

ॐ पूर्वद्वारे द्वारश्रियै नमः - ॐ धात्रे नमः । ॐ विधात्रे नमः ॥

ॐ दक्षिणद्वारे द्वारश्रियै नमः - ॐ जयाय नमः । ॐ विजयाय नमः ॥

ॐ पश्चिमद्वारे द्वारश्रियै नमः - ॐ चण्डाय नमः । ॐ प्रचण्डाय नमः ॥

ॐ उत्तरद्वारे द्वारश्रियै नमः - ॐ नन्दाय नमः । ॐ सुनन्दाय नमः ॥

ॐ ऊर्ध्वद्वारे द्वारश्रियै नमः - ॐ आकाशाय नमः । ॐ अन्तरिक्षाय नमः ॥

ॐ अधोद्वारे द्वारश्रियै नमः - ॐ भूम्यै नमः । ॐ पातालाय नमः ॥

ॐ पूर्वे धर्माय नमः ।

ॐ दक्षिणे ज्ञानाय नमः ।

ॐ पश्चिमे वैराग्याय नमः ।

ॐ उत्तरे ऐश्वर्याय नमः ॥

## *अष्टदिक्पाल पूजा*

ॐ इन्द्राय नमः ।

ॐ अग्नये नमः ।

ॐ यमाय नमः ।

ॐ निरृतये नमः ।

ॐ वरुणाय नमः ।

ॐ वायवे नमः ।

ॐ कुबेराय नमः ।

ॐ ईशानाय नमः ॥

## *पीठपूजा*

ॐ आधारशक्त्यै नमः ।

ॐ मूलप्रकृत्यै नमः ।

ॐ आदिकूर्माय नमः ।

ॐ वराहाय नमः ।

ॐ अनन्ताय नमः ।

ॐ अष्टदिग्गजेभ्यो नमः ।

ॐ क्षीरार्णवाय नमः ।

ॐ श्वेतद्वीपाय नमः ।

ॐ कल्पवृक्षाय नमः ।

ॐ सुवर्णमण्टपाय नमः ।

ॐ सं सत्वाय नमः ।

ॐ रं रजसे नमः ।

ॐ तं तमसे नमः ।

ॐ वह्निमण्डलाय नमः ।

ॐ सूर्यमण्डलाय नमः ।

ॐ सोममण्डलाय नमः ।

ॐ ह्रीं ज्ञानात्मने नमः ।

ॐ चतुर्दशलोकेभ्यो नमः ।

ॐ सप्तसागरेभ्यो नमः ।

ॐ अङ्कुराय नमः ।

ॐ नाळाय नमः ।

ॐ पत्रेभ्यो नमः ।

ॐ केसरेभ्यो नमः ।

ॐ दलेभ्यो नमः ॥

## *ध्यानम्*

कैलासाचलमध्यस्थं कामिताभीष्टदायकम् ।

ब्रह्मादिप्रार्थनाप्राप्त दिव्यमानुषविग्रहम् ॥

भक्तानुग्रहणैकान्त शान्त स्वान्त समुज्ज्वलम् ।

सर्वज्ञं संयमीन्द्राणां सार्वभौमं जगद्गुरुम् ॥

किङ्करीभूतभक्तैनः पङ्कजातविशोषणम् ।

ध्यायामि शङ्कराचार्यं सर्वलोकैकशङ्करम् ॥

चिन्मुद्रां दक्षहस्ते प्रणतजनमहाबोधदात्रीं दधानम् ।

वामे नम्रेष्टदान प्रकटनचतुरं चिह्नमप्यादधानम् ॥

कारुण्यापारवार्धिं यतिवरवपुषं शङ्करं शङ्करांशम् ।

चन्द्राहङ्कारहुङ्कृत् स्मितलसितमुखं भावयाम्यन्तरङ्गे ॥

अस्मिन् बिंबमध्ये श्रीशङ्करभगवत्पादाचार्यस्वामिनं ध्यायामि ॥

## *आवाहनम्*

ॐ स॒हस्र॑शीर्षा॒ पुरु॑षः स॒ह॒स्रा॒क्षः स॒हस्र॑पात् ।

स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा अत्य॑तिष्ठद्दशाङ्गु॒लम् ॥

सद्गुरो शङ्कराचार्य रूपान्तरितविग्रह । साक्षाच्छ्रीदक्षिणामूर्ते कृपयाऽऽवाहितो भव ॥

अस्मिन् बिंबमध्ये श्रीशङ्करभगवत्पादाचार्यस्वामिनं आवाहयामि ॥

## *आसनम्*

ॐ पुरु॑ष ए॒वेद॒ग्ं सर्वं᳚ यद्भू॒तं यच्च॒ भव्यम्᳚ ।

उ॒ताममृ॑त॒त्वस्येशा॑नो यदन्ने॑नाति॒रोह॑ति ॥

आर्याम्बा गर्भसम्भूत मातृवात्सल्यभाजन । जगद्गुरुददाम्येतद्रत्नसिंहासनं शुभम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – रत्नसिंहासनं समर्पयामि ॥

## *पाद्यम्*

ॐ ए॒तावा॑नस्य महि॒मा अतो॒ ज्याया॒ग्ं॑श्च॒ पूरु॑षः ।

पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑ त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥

विद्याधिराजसत्पौत्र विद्याव्यासङ्गतत्पर । विश्वविख्यात वैदुष्य पाद्यमेतद्ददाम्यहम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – पादारविन्दयोः पाद्यं पाद्यं समर्पयामि ॥

*अर्घ्यम्*

ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।

ततो विश्वं व्यक्रामत् साशनानशने अभि ॥

शिवगुर्वन्वयाम्बोधि शरत्पर्वनिशाकर । शिवावतार भगवन् गृहाणार्घ्यं नमोऽस्तुते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – हस्तयोः अर्घ्यमर्घ्यं समर्पयामि ॥

*आचमनम्*

तस्माद्विराडजायत विराजो अधि पूरुषः ।

स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥

दरिद्रब्राह्मणीसद्म स्वर्णामलकवर्षक । विस्मापकस्वात्मवृत्त ददाम्याचमनीयकम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – मुखारविन्दे आचमनीयमाचमनीयं समर्पयामि ॥

*मधुपर्कम्*

ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधुमक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥

जननीसमनुज्ञात सन्यासाश्रमसङ्ग्रह । गन्धर्वशापशमन मधुपर्कं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – मधुपर्कं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - आचमनीयमाचमनीयं समर्पयामि ॥

## स्नानम्

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।

वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मश्शरद्धविः ॥

ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य
भाजयतेह नः । उशतीरिव मातरः । तस्मा अरङ्ग मामवो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - मलापकर्षणस्नानं समर्पयामि ॥

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम् । भवा वाजस्य संगथे ॥
ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।
भवे भवे नाति भवे भवस्व मां भवोद्भवाय नमः ॥

कामधेनोस्समुद्भूतं देवर्षिपितृतृप्तिदम् । पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – क्षीरस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभिनो मुखा करत्प्रण आयूंषि तारिषत् ॥
ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय
नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

चन्द्रमण्डलसङ्काशं सर्वदेवप्रियं दधि । स्नानार्थं ते मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – दधिस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ शुक्रमसि ज्योतिरसि तेजोऽसि देवो
वस्सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः ॥
ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

आज्यं सुराणामाहारः आज्यं यज्ञे प्रतिष्ठितम् । आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यताम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – आज्यस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधुनक्तमुतोषसि मधुमत्पार्थिवं
रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥

सर्वौषधिसमुत्पन्नं पीयूषसदृशं मधु । स्नानार्थं ते प्रयच्छामि गृहाण परमेश्वर ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – मधुस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ स्वा॒दुः पंवस्व दि॒व्याय॒ जन्मंने स्वा॒दुरिन्द्रा॑य सु॒हवी॑तु नाम्ने ।
स्वा॒दुर्मि॒त्राय॒ वरुंणाय वा॒यवे॒ बृह॒स्पतंये॒ मधुंमा॒ꣳ अदा॑भ्यः ॥
ॐ ईशानस्सर्वविद्या॒ना॒मीश्वरस्सर्वभूता॒नां॒ ब्रह्माऽधिंपति॒र्ब्रह्म॒णोऽधिंपति॒र्ब्रह्मां
शि॒वो में अस्तु सदाशि॒वोम् ॥

इक्षुदण्डसमुद्भूत दिव्यशर्करया गुरुम् । स्नपयामि सदा भक्त्या प्रीतो भव महेश्वर ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शर्करास्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ याः फ॒लिनी॒र्या अंफ॒ला अंपु॒ष्पा याश्चं पु॒ष्पिणीः॑ ।
बृह॒स्पतिं प्रसूता॒स्तानों मुंचं॒त्वꣳ हंसः ॥

फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् । तस्मादस्याभिषेकेण सफलास्युर्मनोरथाः ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – नारिकेळ फलोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

गोविन्दभगवत्पाद पादसेवादुरन्धर ।
महावाक्योपदेशाढ्य स्नाहि पञ्चामृतद्रवैः ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - फलपञ्चामृतस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ ओषंधय॒ः संवंदन्ते॒ सोमेंन स॒हराज्ञा॑ । यस्मैं
क॒रोतिं ब्राह्म॒णस्तꣳ रांजन् पारयामसि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – ओषधिस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ ग॒न्ध॒द्वा॒रां दुंराध॒र्षां॒ नि॒त्यपुंष्टां करी॒षिणी॑म् ।
ई॒श्वरीꣳ॑ सर्वभूता॒नां॒ तामि॒होपंह्वये॒ श्रियम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – गन्धोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ आयंनेते प॒रायंणे॒ दूर्वा॑रोहन्तु पु॒ष्पिणीः॑ ।
हृ॒दाश्चं पु॒ण्डरीं॑काणि समु॒द्रस्यं गृ॒हा इ॒मे ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – पुष्पोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ उपा॑स्मै गायता नरः॒ पवं॑माना॒येन्दं॑वे ।
अ॒भिदे॒वाँ॑ इयं॑क्षते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – अक्षतोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ तथ्सु॒वर्ण॒ँ॑ हिरं॑ण्यमभवत् । तथ्सु॒वर्णं॑स्य॒ हिरं॑ण्यस्य॒ जन्मं॑ । य ए॒वँ॑ सु॒वर्णं॑स्य॒ हिरं॑ण्यस्य॒ जन्म॒ वेदं॑ । सु॒वर्ण॑ आ॒त्मनां॑ भवति ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – सुवर्णोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ त्र्यंम्बकं यजामहे सुग॒न्धिं पुं॑ष्टि॒वर्धं॑नम् ।
उ॒र्वा॒रु॒कमिं॑व॒ बन्धं॑नान्मृ॒त्योर्मु॑क्षीय॒ माऽमृता॑त् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – रुद्राक्षोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ मा नं॑स्तो॒के तनं॑ये॒ मान॒ आयुं॑षि॒ मा नो॒ गोषु॒ मा
नो॒ अश्वें॑षु रीरिषः । वी॒रान्मानों॑ रुद्र भामि॒तो
वं॑धीर्ह॒विष्मन्तो॒ नमं॑सा विधेम ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – भस्मस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ नमों॑ बि॒ल्मिनें॑ च कव॒चिनें॑ च॒ नमः॑ श्रु॒तायं॑ च
श्रुतसे॒नायं॑ च ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – बिल्वोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ काण्डा॑त्काण्डात्प्र॒रोहं॑न्ती॒ परुं॑षः परुषः॒ परिं॑ ।
ए॒वा नों॑ दूर्वे॒ प्रतं॑नु स॒हस्रे॑ण श॒तेनं॑ च ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – दूर्वोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन ।
महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य
भाजयतेह नः । उशतीरिव मातरः । तस्मा अरङ्ग
मामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – शुद्धोदकस्नानं समर्पयामि ॥

## *अभिषेकः*

वाराणसीपुरी रम्यगङ्गातीरनिषेवक ।

गङ्गादितीर्थैः श्रीरुद्रमन्त्रैस्त्वां स्नपयाम्यहम् ॥

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय। गातुं यज्ञपतये । दैवीस्स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे। शं चतुष्पदे । ॐ शान्तिश्शान्तिश्शान्तिः ॥
ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् । पुरुष एवेद॰ सर्वम् । यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः । यदन्नेनातिरोहति । एतावानस्य महिमा । अतो ज्याया॰ँश्च पूरुषः। पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाऽऽभवात्पुनः । ततो विश्वङ्व्यक्रामत् । साशनानशने अभि । तस्माद्विराडजायत । विराजो अधि पूरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः । यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः । सप्तास्यासन् परिधयः । त्रिस्सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः । तेन देवा अयजन्त । साध्या ऋषयश्च ये । तस्माद्यज्ञात्सर्व हुतः । संभृतं पृषदाज्यम् । पशू॰स्ता॰श्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये । तस्माद्यज्ञात्सर्वहुतः । ऋचस्सामानि जज्ञिरे । छन्दा॰ँसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत । तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः । पद्भ्या॰ शूद्रो अजायत । चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौस्समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोका॰ अकल्पयन् । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते। धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान् प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्यास्सन्ति देवाः । अद्भ्यः संभूतः पृथिव्यै रसाच्च ।

वि॒श्वक॑र्मण॒स्सम॑वर्त॒ताधि॑ । तस्य॒ त्वष्टा॑ वि॒दध॑द्रू॒पमे॑ति । तत्पुरु॑षस्य॒ विश्व॒माजा॑न॒मग्रे॓ । वेदा॒हमे॒तं पुरु॑षं म॒हान्त॓म्। आ॒दि॒त्यव॑र्णं॒ तम॑सः॒ पर॑स्तात्। तमे॒वं वि॒द्वान॒मृत॑ इ॒ह भ॑वति । नान्यः पन्था॑ विद्य॒तेय॑ऽनाय । प्र॒जाप॑तिश्चरति॒ गर्भे॑ अ॒न्तः । अ॒जाय॑मनो बहु॒धा विजा॑यते। तस्य॒ धीरा॒ः परि॑जानन्ति॒ योनि॓म्। मरी॑चीनां प॒दमि॑च्छन्ति वे॒धस॑ः॥ यो दे॒वेभ्य॒ आत॑पति । यो दे॒वानां॓ पु॒रोहि॑तः। पूर्वो॒ यो दे॒वेभ्यो॑ जा॒तः । नमो॑ रु॒चाय॒ ब्राह्म॑ये। रुचं॑ ब्रा॒ह्मम् ज॒नय॑न्तः । दे॒वा अग्रे॒ तद॑ब्रुवन्। यस्त्वै॒वं ब्रा॓ह्म॒णो वि॒द्यात् । तस्य॑ दे॒वा अस॒न् वशे॓। ह्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्यौ॓। अ॒हो॒रा॒त्रे पा॒र्श्वे। नक्ष॑त्राणि रू॒पम् । अ॒श्विनौ॒ व्यात्त॓म्। इ॒ष्टम् म॑निषाण । अ॒मुं म॑निषाण। सर्व॑म् मनिषाण ॥
तच्छं॒ योरावृ॑णीमहे । गा॒तुं य॒ज्ञाय॑। गा॒तुं यज्ञप॑तये । दैवी॓स्व॒स्तिर॑स्तु नः । स्व॒स्तिर्मानु॑षेभ्यः । ऊ॒र्ध्वं जि॑गातु भेष॒जम् । शन्नो॑ अस्तु द्वि॒पदे॓। शं चतु॑ष्पदे । ॐ शान्ति॒श्शान्ति॒श्शान्ति॑ः ॥

ॐ नम॒ः सोमा॑य च रु॒द्राय॑ च॒ नम॑स्ता॒म्राय॑ चारु॒णाय॑ च॒ नम॑ः शङ्गा॒य॑ च पशु॒पत॑ये च॒ नम॑ उ॒ग्राय॑ च भी॒माय॑ च॒ नमो॑ अग्रेव॒धाय॑ च दूरेव॒धाय॑ च॒ नमो॑ ह॒न्त्रे च॒ हनी॑यसे च॒ नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यो॒ नम॑स्ता॒राय॒ नम॑श्शं॒भवे॑ च मयो॒भवे॑ च॒ नम॑ः शंक॒राय॑ च मयस्क॒राय॑ च॒ नम॑ः शि॒वाय॑ च शि॒वत॑राय च॒ नम॒स्तीर्थ्या॑य च॒ कूल्या॑य च॒ नम॑ः पा॒र्या॑य चावा॒र्या॑य च॒ नम॑ः प्र॒तर॑णाय चो॒त्तर॑णाय च॒ नम॑ आता॒र्या॑य चाला॒द्या॑य च॒ नम॒ः शष्प्या॑य च॒ फेन्या॑य च॒ नम॑ः सिक॒त्या॑य च प्रवा॒ह्या॑य च ॥

ॐ त्र्य॑म्बकं यजामहे सुग॒न्धिं पु॑ष्टि॒वर्ध॑नम् ।
उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ माऽमृता॓त् ॥
ॐ यो रु॒द्रो अ॒ग्नौ यो अ॒प्सु य ओष॑धीषु॒ यो रु॒द्रो विश्वा॒ भुव॑नाऽऽवि॒वेश॒ तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु ॥
ये ते॑ स॒हस्र॑म॒युतं॒ पाशा॒ मृत्यो॒ मर्त्या॑य॒ हन्त॑वे । तान् य॒ज्ञस्य॑ मा॒यया॒ सर्वा॒नव॑ यजामहे । मृ॒त्यवे॒ स्वाहा॑ मृ॒त्यवे॒ स्वाहा॓ ॥ ॐ नमो भगवते रुद्राय विष्णवे मृत्यु॑र्मे पा॒हि । प्राणानां ग्रन्थिरसि रुद्रो मा॑ विशा॒न्तकः । तेनान्नेना॓प्याय॒स्व ॥ ६॥ नमो रुद्राय विष्णवे मृत्यु॑र्मे पा॒हि । स॒दा॒शि॒वोम् ॥

ॐ शं च॑ मे॒ मय॑श्च मे प्रि॒यं च॑ मेऽनुका॒मश्च॑ मे॒ काम॑श्च मे सौमन॒सश्च॑ मे भ॒द्रं च॑ मे॒ श्रेय॑श्च मे॒ वस्य॑श्च मे॒ यश॑श्च मे॒ भग॑श्च मे॒ द्रवि॑णं च मे य॒न्ता च मे ध॒र्ता च मे॒ क्षेम॑श्च मे॒ धृति॑श्च मे॒ विश्वं॑ च मे॒ मह॑श्च मे सं॒विच्च॑ मे॒ ज्ञात्रं॑ च मे॒ सूश्च॑ मे प्र॒सूश्च॑ मे॒ सीरं॑ च मे ल॒यश्च॑ म ऋ॒तं च॑ मे॒ऽमृतं॑ च मेऽय॒क्ष्मं च॒ मेऽना॑मयच्च मे जी॒वातु॑श्च मे दीर्घायु॒त्वं च॑ मेऽनमि॒त्रं च॒ मेऽभ॑यं च मे सु॒गं च॑ मे॒ शय॑नं च मे सू॒षा च॑ मे सु॒दिनं॑ च मे ॥
ॐ इडा॑ देव॒हूर्मनु॑र्यज्ञ॒नीर्बृह॒स्पति॑रुक्थाम॒दानि॑ शꣳसिष॒द्विश्वे॑दे॒वाः सू॓क्त॒वाच॒ः पृथि॑वीमात॒र्मा मा॑ हिꣳसी॒र्मधु॑ मनिष्ये॒ मधु॑ जनिष्ये॒ मधु॒ वक्ष्यामि॒ मधु॑ वदिष्यामि॒ मधु॑मतीं दे॒वेभ्यो॒ वाच॑मुद्यासꣳ शुश्रू॒षेण्या॓ं मनु॒ष्ये॓भ्य॒स्तं मा॑ दे॒वा अ॑वन्तु शो॒भायै॑ पि॒तरोऽनु॑मदन्तु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ हि॒र॑ण्यवर्णां॒ हरि॑णीं सुव॒र्णर॑जत॒स्रजाम् ।

च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥ १॥

तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी॓म् ।

यस्यां॒ हिर॑ण्यं वि॒न्देयं॒ गामश्वं॒ पुरु॑षान॒हम् ॥ २ ॥

अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना॓दप्र॒बोधि॑नीम् ।

श्रियं॓॑ दे॒वीमुप॑ह्वये॒ श्रीर्मा॓दे॒वी जु॑षताम् ॥ ३ ॥

कां॒ सो॒स्मि॒तां हिर॑ण्यप्रा॒कारा॑मा॒र्द्रां ज्वल॑न्तीं तृ॒प्तां त॒र्पय॑न्तीम् ।

प॒द्मे॒स्थि॒तां प॒द्मव॑र्णां॒ तामि॒होप॑ह्वये॒ श्रियम् ॥ ४ ॥

च॒न्द्रां प्र॑भा॒सां य॒शसा॒ ज्वल॑न्तीं॒ श्रियं॑ लो॒के दे॒वजु॑ष्टामुदा॒राम् ।

तां प॒द्मिनी॑मीं॒ शर॑णम॒हं प्रप॑द्येऽल॒क्ष्मीर्मे नश्यतां॒ त्वां वृ॑णे ॥ ५ ॥

आ॒दि॒त्यव॑र्णे तप॒सोऽधि॑जा॒तो वन॒स्पति॒स्तव॑ वृ॒क्षोऽथ बि॒ल्वः ।

तस्य॒ फला॓नि॒ तप॒सानु॑दन्तु मा॒या॑न्तरा॒याश्च॑ बा॒ह्या अल॒क्ष्मीः ॥ ६ ॥

उपै॑तु॒ मां दे॓वस॒खः की॒र्तिश्च॒ मणि॑ना स॒ह ।

प्रा॒दु॒र्भू॒तोऽस्मि॑ रा॒ष्ट्रेऽस्मिन् की॒र्तिमृ॑द्धिं॒ द॒दातु॑ मे ॥ ७ ॥

क्षुत्पि॑पा॒साम॑लां ज्ये॒ष्ठाम॑ल॒क्ष्मीं नाशया॒म्यहम् ।

अभू॑तिमस॑मृद्धिं॒ च स॒र्वां॒ निर्णु॑दमे॒ गृहा॑॑त् ॥८ ॥

गं॒ध॒द्वा॒रां दु॑राध॒र्षां॒ नि॒त्यपु॑ष्टां करी॒षिणी॓म् ।

ई॒श्वरीं॓ सर्वभूता॒नां॒ तामि॒होप॑ह्वये॒ श्रियम् ॥ ९ ॥

मन॑सः॒ काम॒माकू॓तिं वा॒चः स॒त्यम॑शीमहि ।

प॒शू॒नां रू॒पमन्न॑स्य॒ मयि॒ श्रीः श्र॑यतां॒ यशः॑ ॥ १० ॥

क॒र्दमे॑न प्र॑जाभूता॒म॒यि॒ सम्भ॑व क॒र्दम ।

श्रियं॑ वा॒सय॑ मे कु॒ले मा॒तरं॑ पद्म॒मालि॑नीम् ॥ ११ ॥

आपः॑ सृ॒जन्तु स्नि॒ग्धा॒नि॒ चि॒क्ली॒त व॑सम॒े गृहे ।

नि॒च॑ दे॒वीं मा॒तरं॒ श्रियं॑ वा॒सय॑ मे कु॒ले ॥ १२ ॥

आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं॒ सु॒वर्णां हे॒म॒मालि॑नीम् ।

सू॒र्यां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आवह ॥ १३ ॥

आ॒र्द्रां यः॒ करि॑णीं य॒ष्टिं पि॒ङ्ग॒लां प॑द्म॒मालि॑नीम् ।

च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥ १४ ॥

तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी॓म् ।

यस्यां॒ हिर॑ण्यं॒ प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वा॓न् वि॒न्देयं॒ पुरु॑षान॒हम् ॥ १५ ॥

म॒हा॒दे॒व्यै च॑ वि॒द्महे॑ विष्णुप॒त्न्यै च॑ धीमहि तन्नो॑ लक्ष्मीः प्रचो॒दया॓त् ॥

ॐ जा॒तवे॑दसे सुनवाम॒ सोम॑मरातीय॒तो निद॑हाति॒ वेदः॑ ।

स नः॑ पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॑ ना॒वेव॒ सिन्धुं॑ दुरि॒तात्य॒ग्निः ॥ १॥

ताम॒ग्निव॑र्णां॒ तप॑सा ज्वल॒न्तीं वै॑रोच॒नीं क॑र्मफ॒लेषु॒ जुष्टा॓म् ।

दु॒र्गां दे॒वीꣳ शर॑णम॒हं प्रप॑द्ये सु॒तर॑सितरसे॒ नमः॑ ॥ २॥

अग्ने॒ त्वं पा॑रया॒नव्यो॑ अ॒स्मान् स्व॒स्तिभि॒रति॑ दु॒र्गाणि॒ विश्वा॓ ।

पूश्च॑ पृ॒थ्वी ब॑हु॒ला न॑ उ॒र्वी भवा॑ तो॒काय॒ तन॑याय॒ शं योः ॥ ३॥

विश्वा॑नि नो दु॒र्गहा॑ जातवेद॒स्सिन्धु॒न्नना॒वा दु॑रि॒ताऽति॑पर्षि ।

अग्ने॑ अत्रि॒वन्मन॑सा गृणा॒नो॓ऽस्माकं॑ बोद्ध्यवि॒ता त॒नूना॓म् ॥ ४॥

पृ॒त॒ना॒जित॒ꣳ सह॑मानमु॒ग्रम॒ग्निꣳ हु॑वेम प॒रमाथ्स॒धस्था॓त् ।

स नः॑ पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॒ क्षाम॑द्दे॒वो अति॑ दु॒रि॒तात्य॒ग्निः ॥ ५॥

प्र॒त्नोषि॑क॒मीड्यो॑ अध्व॒रेषु॑ स॒नाच्च॒ होता॒ नव्य॑श्च॒ सत्सि॑ ।

स्वाञ्चा॓ग्ने त॒नुवं॑ पि॒प्रय॑स्वा॒स्मभ्यं॑ च॒ सौभ॑ग॒माय॑जस्व ॥ ६॥

गोभि॒र्जुष्ट॑म॒युजो॒ निषि॑क्तं॒ तवे॓न्द्र विष्णो॒रनु॒सञ्च॑रेम ।

नाक॑स्य पृ॒ष्ठम॒भिसं॒वसा॑नो॒ वैष्ण॑वीं लो॒क इ॒हमा॑दयन्ताम् ॥ ७॥

का॒त्या॒य॒नाय॑ वि॒द्महे॑ कन्यकु॒मारि॑ धीमहि तन्नो॑ दुर्गिः प्रचो॒दया॓त् ॥

ॐ भूर्भुवस्स्वः । अमृताभिषेकोऽस्तु ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - स्नानाङ्गमाचमनीयमाचमनीयं समर्पयामि ॥

## *वस्त्रयुग्मम्*

ॐ स॒प्तास्या॑सन् परि॒धय॑: । त्रिस्स॒प्त स॒मिध॑: कृ॒ताः । दे॒वा यद्य॒ज्ञं त॑न्वा॒नाः । अब॑ध्नन् पु॑रुषं प॒शुम् ।

भाष्यभागीरथीपाथः पवित्रीकृतभूतल । भाष्यप्रवचनासक्त वस्त्रयुग्मं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – वस्त्रयुग्मं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - आचमनीयमाचमनीयं समर्पयामि ॥

## *श्रीगन्धम्*

ॐ तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॑न्। पुरु॑षं जा॒तम॑ग्र॒तः । तेन॑ दे॒वा अय॑जन्त । सा॒ध्या ऋष॑यश्च ये । तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॑: । संभृ॑तं पृषदा॒ज्यम् । प॒शूᳫ॑स्ताᳫश्च॑क्रे वाय॒व्यान्॑ । आ॒र॒ण्यान् ग्रा॒म्याश्च ये ।
गं॑ध॒द्वा॒रां दु॑राध॒र्षां॒ नि॒त्यपु॑ष्टां करी॒षिणी॑म् । ई॒श्वरी॑ᳫ सर्वभू॒ता॒नां॒ तामि॒होप॑ह्वये॒ श्रियम् ॥

सनन्दनादि मेधाविपण्डितच्छात्र संवृत ।

सर्वशास्त्रार्थनिपुण गन्धान् धारय सादरम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - दिव्यगन्धान्धारयामि ॥

## *अक्षतम्*

ॐ तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॑: । ऋच॒स्सामा॑नि जज्ञिरे ।

छन्दाᳫ॑ᳫसि जज्ञि॒रे॒ तस्मा॑त् । यजु॒स्तस्मा॑दजायत ।

आय॑नेते प॒राय॑णे॒ दूर्वा॑रोहन्तु पु॒ष्पिणी॑: ।

ह्र॒दाश्च॑ पु॒ण्डरी॑काणि समु॒द्रस्य॑ गृ॒हा इ॒मे ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - गन्धस्योऽपरि अलङ्करणार्थे अक्षतान् समर्पयामि ॥

## *भस्मोद्धूलनम्*

ॐ मा न॑स्तो॒के तन॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा

नो॒ अश्वे॑षु रीरिषः । वी॒रान्मानो॑ रुद्र भामि॒तो

व॑धीर्ह॒विष्मन्तो॒ नम॑सा विधेम ते ॥

वृद्धवेषप्रतिच्छन्न व्याससन्दर्शनोत्सुक ।

भस्मोद्धूलितसर्वाङ्ग भस्म दिव्यं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – भस्मोद्धूलनं समर्पयामि ॥

### *कुङ्कुमचूर्णम्*

व्यासदत्त वरप्राप्त षोडशाब्दायुरुज्ज्वल ।

किङ्करीभूतभूपाल कुङ्कुमं ते ददाम्यहम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – कुङ्कुमचूर्णं समर्पयामि ॥

### *रुद्राक्षमालिका*

श्रीमन्मण्डनमिश्रादि वादकेळिविशारद ।

दुर्वादतूलवातूल भज रुद्राक्षमालिकाम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – रुद्राक्षमालिकां समर्पयामि ॥

ॐ नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒ नमः॑ श्रु॒ताय॑ च श्रुतसे॒नाय॑ च ॥

श्रीमन्मण्डनकर्णोक्त महावाक्यादिमन्त्रक । सुरेश्वराख्या सन्दायिन् बिल्वपत्रं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – बिल्वपत्रं समर्पयामि ॥

### *पुष्पमालिका*

ॐ तस्मा॒दश्वा॑ अजायन्त । ये के चो॑भ॒याद॑तः । गावो॑ ह

जज्ञिरे॒ तस्मा॓त् । तस्मा॓ज्जा॒ता अ॑जा॒वयः॑ ।

सुरेश पद्मचरण हस्तामलक तोटकैः ।

अन्यैश्च शिष्यैः संवीत पुष्पमालां ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – पुष्पमालिकां समर्पयामि ॥

## *अथ पत्रपूजा*

ॐ शिवरूपाय नमः - बिल्वपत्रं समर्पयामि ।

ॐ शक्तिरूपाय नमः - कदम्बपत्रं समर्पयामि ।

ॐ विष्णुरूपाय नमः - तुलसीपत्रं समर्पयामि ।

ॐ लक्ष्मीरूपाय नमः - तामरसपत्रं समर्पयामि ।

ॐ ब्रह्मरूपाय नमः - दाडिमीपत्रं समर्पयामि ।

ॐ सरस्वतीरूपाय नमः - मल्लिकापत्रं समर्पयामि ।

ॐ गणपतिरूपाय नमः - दूर्वापत्रं समर्पयामि ।

ॐ षण्मुखरूपाय नमः - मरुवकपत्रं समर्पयामि ।

ॐ श्रीचक्र रूपाय नमः - अशोकपत्रं समर्पयामि ।

ॐ श्रीदक्षिणामूर्तिरूपाय नमः - नानाविध पत्राणि समर्पयामि ॥

## *अथ पुष्पपूजा*

ॐ शिवरूपाय नमः - जातीपुष्पं समर्पयामि ।

ॐ शक्तिरूपाय नमः - कदम्बपुष्पं समर्पयामि ।

ॐ विष्णुरूपाय नमः - तुलसीपुष्पं समर्पयामि ।

ॐ लक्ष्मीरूपाय नमः - पद्मपुष्पं समर्पयामि ।

ॐ ब्रह्मरूपाय नमः - श्वेतकमलपुष्पं समर्पयामि ।

ॐ सरस्वतीरूपाय नमः - मल्लिकापुष्पं समर्पयामि ।

ॐ गणपतिरूपाय नमः - कल्हारपुष्पं समर्पयामि ।

ॐ षण्मुखरूपाय नमः - जपापुष्पं समर्पयामि ।

ॐ श्रीचक्र रूपाय नमः - अशोकपुष्पं समर्पयामि ।

ॐ श्रीदक्षिणामूर्तिरूपाय नमः - नानाविध पुष्पाणि समर्पयामि ॥

# श्रीशङ्कराचार्याष्टोत्तरशतनामावलिः

ॐ श्रीमत्कैलासनिलयशङ्कराय नमो नमः ।
ॐ ब्रह्मविद्याऽम्बिकाश्लिष्टवामाङ्गाय नमो नमः ।
ॐ ब्रह्मोपेन्द्रमहेन्द्रादिप्रार्थिताय नमो नमः ।
ॐ भक्तानुग्रहणैकान्तशान्तस्वान्ताय ते नमः ।
ॐ नास्तिकाक्रान्तवसुधा पालकाय नमो नमः ।
ॐ कर्मकाण्डावनस्कन्दप्रेषकाय नमो नमः ।
ॐ लोकानुग्रहणोपात्तनृदेहाय नमो नमः ।
ॐ कालटीक्षेत्रवासादिरसिकाय नमो नमः ।
ॐ पूर्णानदीतीरवासलोलुपाय नमो नमः ।
ॐ विद्याधिराजसद्वंशपावनाय नमो नमः ।
।। १० ।।
ॐ आर्याम्बिकागर्भवासनिर्भराय नमो नमः ।
ॐ शिवगुर्वाप्तसुकृतसत्फलाय नमो नमः ।
ॐ आर्याशिवगुरुप्रीतिभाजनाय नमो नमः ।
ॐ ईश्वराब्धीयवैशाखपञ्चमीजन्मने नमः ।
ॐ निजावतारानुगुण शङ्कराख्याभृते नमः ।
ॐ नामसंख्यासमुन्नेयजन्मकालाय ते नमः ।
ॐ शङ्कराख्यासुविख्यातमङ्गलाय नमो नमः ।
ॐ पितृदत्तान्वर्थभूतनामधेयाय ते नमः ।
ॐ बाललीलातोषितस्वमातृकाय नमो नमः ।
ॐ प्रथमाब्दाभ्यस्तनानाभाषाढ्याय नमो नमः ।
।। २० ।।
ॐ द्वितीयाब्दकृतस्वीयसच्चूडाकृतये नमः ।
ॐ निजताववियोगार्तमात्राश्वासकृते नमः ।
ॐ मातृकारितसद्विप्रसम्स्काराय नमो नमः ।
ॐ पलाशदण्डमौञ्ज्यादिभासुराय नमो नमः ।
ॐ सन्ध्याग्निसेवानुष्ठाननिरताय नमो नमः ।
ॐ विद्यागुरुकुलैकान्तनिवासाय नमो नमः ।
ॐ विद्याग्रहणनैपुण्यविस्मापनकृते नमः ।
ॐ अभ्यस्यवेदवेदाङ्गसन्दोहाय नमो नमः ।
ॐ भिक्षाशनादिनियमपालकाय नमो नमः ।
ॐ विद्याविनयसम्पत्तिविख्याताय नमो नमः ।
।। ३० ।।
ॐ भिक्षामलकसन्दातृसतीशोकहृते नमः ।
ॐ स्वर्णामलकसद्वृष्टिकारकाय नमो नमः ।
ॐ न्यायसांख्यादिशास्त्राब्धिमथनाय नमो नमः ।
ॐ जैमिनीयनयार्णोधिकर्णधाराय ते नमः ।
ॐ पातञ्जलनयारण्यपञ्चास्याय नमो नमः ।
ॐ मातृशुश्रूषणासक्तमानसाय नमो नमः ।
ॐ पूर्णासामीप्यसन्तुष्टमातृकाय नमो नमः ।
ॐ केरलेशकृतग्रन्थप्रेक्षकाय नमो नमः ।
ॐ दत्तराजोपहारादिनिराशाय नमो नमः ।
ॐ स्वावतारफलप्राप्तिनिरीक्षणकृते नमः
।। ४०।।
ॐ सन्यासग्रहणोपायचिन्तकाय नमो नमः ।
ॐ नक्रग्रहमिषावाप्तमात्राज्ञाय  नमो नमः ।
ॐ प्रैषोच्चारणसंत्यक्तनक्रपीडाय ते नमः ।
ॐ अन्त्यकालस्वसानिध्यशम्सकाय नमो नमः ।
ॐ गोविन्दभगवत्पादान्वेषकाय नमो नमः ।
ॐ गोविन्दशिष्यताप्राप्तिप्रशम्सनकृते नमः ।
ॐ आर्यपादमुखावाप्तब्रह्मविद्याय ते नमः ।
ॐ नर्मदातटिनीतीरस्तम्भकाय नमो नमः ।

ॐ गुर्वनुज्ञातविश्वेशदर्शनाय नमो नमः ।
ॐ वाराणसीविश्वनाथक्षेत्रगाय  नमो नमः ।
।।५०।।
ॐ चण्डालाकृतिविश्वेशवादसंश्राविणे नमः ।
ॐ मनीषापञ्चकस्तोत्रश्रावकाय नमो नमः ।
ॐ साक्षात्कृतमहादेवस्वरूपाय नमो नमः ।
ॐ गुरुविश्वेश्वराज्ञप्तभाष्यग्रन्थकृते नमः ।
ॐ नानाभाष्यप्रकरणस्तोत्रजातकृते नमः ।
ॐ देवतागुरुविप्रादिभक्तिसंधुक्षिणे नमः ।
ॐ भाष्याद्यध्यापनासक्तमानसाय नमो नमः ।
ॐ आनन्दादिशिष्यौघसंवृताय नमो नमः ।
ॐ पद्मपादाभिधालाभहृष्टशिष्याय ते नमः ।
ॐ आचार्यभक्तिमाहात्म्यनिदर्शनकृते नमः ।
।।६०।।
ॐ वृद्धव्यासपरामृष्टभाष्यार्थाय नमो नमः ।
ॐ व्यासप्रशंसिताशेषभाष्यजाताय ते नमः ।
ॐ तत्तत्प्रश्नोत्तरश्रोतृव्यासप्रीतिकृते नमः ।
ॐ नारायणावतारत्वस्मारकाय नमो नमः ।
ॐ वेदव्यासवरप्राप्तषोडशाब्दायुषे नमः ।
ॐ कुमारिलजयाशम्साशम्सकाय नमो नमः ।
ॐ तुषाग्निस्थितभट्टोक्तिश्लाघकाय नमो नमः ।
ॐ सुब्रह्मण्यावतारश्रीभट्टनुग्राहिणे नमो नमः ।
ॐ मण्डनाख्यमहासूरिविजयाशम्सिने नमः ।
ॐ माहिष्मतीपुरोपान्तपावनाय नमो नमः ।
।।७०।।
ॐ शुकसूचिततद्गेहदर्शकाय नमो नमः ।
ॐ वादभिक्षापेक्षणादिस्वाशयोद्घाटिने नमः ।
ॐ व्यासजैमिनिसानिध्यवावदूकाय ते नमः ।
ॐ मण्डनीयप्रश्नजातोत्तरदात्रे  नमो नमः ।
ॐ मध्यस्थभारतीवाक्यप्रमाणाय नमो नमः ।
ॐ मालामालिन्यनिर्विण्णमण्डनार्यजिते नमः ।
ॐ प्रवृत्तिमार्गपारम्यवारकाय नमो नमः ।
ॐ कर्मकाण्डीयतात्पर्योद्धारकाय नमो नमः ।
ॐ ज्ञानकाण्डप्रमाणत्वसमर्थनकृते नमः ।
ॐ युक्तिसाहस्रतोऽद्वैतसाधकाय नमो नमः ।
।।८०।।
ॐ जीवब्रह्मैक्यसिद्धान्तसंस्थापनकृते नमः ।
ॐ निजापजयनिर्विण्णमण्डनेड्यपदे नमः ।
ॐ सन्यासकृन्मण्डनानुग्राहकाय  नमो नमः ।
ॐ महावाक्योपदेशादिदायकाय नमो नमः ।
ॐ सुरेश्वराभिधाजुष्टशिष्यानुग्राहिणे नमः ।
ॐ वनदुर्गामन्त्रबद्धभारतीवपुषे नमः ।
ॐ शृङ्गाद्रिक्षेत्रसानिध्यप्रार्थकाय नमो नमः ।
ॐ श्रीशारदादिव्यमूर्तिस्थापकाय नमो नमः ।
ॐ शृङ्गाद्रिशारदपीठसंस्थापनकृते नमः ।
ॐ द्वादशाब्दनिजावासपूतशृङ्गाद्रये नमः ।
।।९०।।
ॐ प्रत्यहं भाष्यपाठादिकालक्षेपकृते नमः ।
ॐ अन्त्यकालस्मृतिप्राप्तमातृपार्श्वाय ते नमः ।
ॐ मातृसंस्कारनिर्व्यूढप्रतिज्ञाय नमो नमः ।
ॐ पञ्चपादीसमुद्धारप्रीतपद्माङ्घ्रये नमः ।
ॐ स्ववधोद्युक्तकापालिकोपेक्षणकृते नमः ।
ॐ स्वशिष्यमारितस्वीयमारकाय नमो नमः ।
ॐ परकायप्रवेशादियोगसिद्धिमते नमः ।

ॐ लक्ष्मीनृसिंहकरुणाशान्तदेहाधये नमः ।

ॐ गोकर्णनाथमूकाम्बासन्दर्शनकृते नमः ।

ॐ मृतपुत्रोज्जीवनादिमहाश्चर्यकृते नमः ।

।।१००।।

ॐ मूकबालकसम्भाषाद्यमानुषकृते नमः ।

ॐ हस्तामलकनामाढ्यशिष्योपेताय ते नमः ।

ॐ चतुर्दिक्चतुराम्नायस्थापकाय नमो नमः ।

ॐ तोटकाभिधसच्छिष्यसंग्रहाय नमो नमः ।

ॐ हस्ततोटकपद्मांघ्रिसुरेशाराध्य ते नमः ।

ॐ काश्मीरगतसर्वज्ञपीठगाय नमो नमः ।

ॐ केदारान्तर्धिकैलासप्राप्तिकर्त्रे नमो नमः ।

ॐ कैलासाचलसंवासिपार्वतीशाय ते नमः ।

ॐ मङ्गलौघलसत्सर्वमङ्गलापतये नमः ॥

## *धूपम्*

ॐ यत्पुरु॑षं॒ व्य॑दधुः । क॒ति॒धा व्य॑कल्पयन् । मुखं॒ किम॑स्य॒ कौ बा॒हू । कावू॒रू पादा॑वुच्येते ।

ॐ धूर॑सि॒ धूर्व॒ धूर्व॑न्तं॒ धूर्व॒तं यो॑ऽस्मान् धूर्व॑ति॒तं धूँर्व॒यं व॒यं धूर्वा॑म॒स्त्वं दे॒वाना॑मसि॒। सस्नि॑तम॒ं पप्रि॑तम॒ं जुष्ट॑तम॒ं वह्नि॑तमं दे॒वहू॑तम॒मह्रु॑तमसि हवि॒र्धानं॒ दृꣳह॑स्व॒ माह्वा॑र्मि॒त्रस्य॑ त्वा॒ चक्षु॑षा॒ प्रेक्षे॒ माभेर्मा संवि॑क्था॒ मा त्वा॑ हिꣳसिषम् ॥

सर्वज्ञपीठिकारोहसमुत्सुकितमानस ।

सर्वज्ञमूर्ते सर्वात्मन् धूपमाजिघ्र सादरम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – धूपमाघ्रापयामि ॥

## *दीपम्*

ॐ ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीत् । बा॒हू रा॑ज॒न्य॑ः कृ॒तः । ऊ॒रू तद॑स्य॒ यद्वैश्य॑ः । प॒द्भ्याꣳ शू॒द्रो अ॑जायत ॥

उद्दी॑प्यस्व जातवेदोऽप॒घ्नन्निरृ॑तिं॒ मम॑ ।

प॒शूꣳश्च॒ मह्य॒माव॑ह॒ जीव॑नं च॒ दिशो॑ दिश ।

मा॑नो हिꣳसीज्जातवेदो॒ गामश्वं॒ पुरु॑षं॒ जग॑त् ।

अबि॑भ्र॒दग्न॒ आग॑हि श्रि॒या मा॒ परि॑पातय ॥

सरस्वतीकृतप्रश्नोत्तरदानविचक्षण ।

शृङ्गाद्रिस्थानतत्संस्थाकारिन् दीपं गृहाण भोः ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - दीपं दर्शयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – धूपदीपानन्तरं आचमनीयमाचमनीयं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – आचमनानन्तरं परिमलपत्रपुष्पाणि समर्पयामि ॥

## नैवेद्यम्

*[नैवेद्यपदार्थान् गायत्र्या प्रोक्ष्य]*

ॐ भूर्भुवस्सुवः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥

सत्यं त्वर्तेन परिषिञ्चामि ॥

कामधेनुं स्मरामि *[धेनुमुद्रां प्रदर्श्य]*

अमृतमस्तु । अमृतोपस्तरणमसि ॥

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा ।

ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा । ॐ ब्रह्मणे स्वाहा ॥

ॐ चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत ।

मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ।

षण्मतस्थापनाचार्य षड्दर्शनविशारद ।

गृहाण षड्रसोपेतं भक्ष्यभोज्यादिकं प्रभो ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – नैवेद्यं समर्पयामि ॥

सर्वदिक् चतुराम्नायव्यवस्थापक शङ्कर ।

सर्वलोकैकसम्पूज्य पानीयं प्रतिगृह्यताम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - मध्ये मध्ये अमृतपानीयं समर्पयामि ॥

अ॒मृ॒ता॒पि॒धा॒नम॑सि - उत्तरापोशनं समर्पयामि ।

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – हस्तप्रक्षाळनं समर्पयामि । गण्डूषं समर्पयामि । पादप्रक्षाळनं समर्पयामि । आचमनीयमाचम्नीयं समर्पयामि । करोद्वर्तनं समर्पयामि ॥

*ताम्बूलम्*

ॐ नाभ्या॑ आसीद॒न्तरि॑क्षम् । शी॒र्ष्णो द्यौस्सम॑वर्तत ।

प॒द्भ्यां भूमि॒र्दिशः॒ श्रोत्रा॓त् । तथा॑ लो॒का२॑ अ॑कल्पयन् ॥

सर्वलोकसुविख्यात यशोराशिनिशाकर ।

सर्वात्मभूत सुगुरो ताम्बूलं प्रददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – पूगीफल ताम्बूलं समर्पयामि ॥

*मङ्गलनीराजनम्*

ॐ वेदा॒हमे॒तं पुरु॑षं म॒हान्तम्॓ । आ॒दि॒त्यव॑र्णं॒

तम॑सस्तु पा॒रे। सर्वा॑णि रू॒पाणि॑ वि॒चित्य॒ धीरः॑ ।

नामा॑नि कृ॒त्वाऽभि॒वद॒न् यदास्ते॓॥

सोमो॒ वा ए॒तस्य॑ रा॒ज्यमाद॑त्ते । यो राजा॒ सन्रा॒ज्यो वा॒ सोमे॑न॒ यज॑ते । दे॒व॒सु॒वामे॒तानि॑ ह॒वीꣳषि॑ भवन्ति । ए॒ताव॑न्तो॒ वै दे॒वाना॒ꣳ॑ स॒वाः । त ए॒वास्मै॑ स॒वान् प्रय॑च्छन्ति । त ए॑नं॒ पुन॑स्सुवन्ते रा॒ज्याय॑ । दे॒व॒सू राजा॑ भवति ॥

साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठिकं राज्यं महाराज्यमाधिपत्यम् ॥

न तत्र सूर्यो भाति न चन्द्रता॒रक॒ं नेमा विद्युतो भान्ति कुतो॑ऽयम॒ग्निः ।

तमेव भान्तमनुभा॑ति स॒र्वं॒ तस्य भासा सर्वमिदं॑ विभा॒ति ॥

प्रस्थानत्रयीभाष्यनिर्माणैक विशारद ।

अज्ञानतिमिरोत्सारिन् पश्य नीराजनप्रभाम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - दिव्यमङ्गलनीराजनं दर्शयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – नीराजनानन्तरं आचमनीयमाचमनीयं समर्पयामि ।
आचमनानन्तरं परिमलपत्रपुष्पाणि समर्पयामि ॥

## *रक्षाधारणम्*

ॐ बृहत् सामं क्षत्त्रभृद्वृद्धवृंष्णियं

त्रिष्टुभौजंश्शुभितमुग्रवींरम् । इन्द्रस्तोमेंन

पञ्चदशेन मध्यंमिदं वातेंन सगंरेण रक्ष ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - रक्षां धारयामि ॥

## *मन्त्रपुष्पम्*

ॐ धाता पुरस्ताद्यमुंदाजहारं । शक्रः प्रविद्वान्

प्रदिशश्चतंस्रः । तमेवं विद्वानमृतं इह

भंवति । नान्यः पन्था अयंनाय विद्यते ॥

राजाधिराजायं प्रसह्यसाहिनें । नमों वयं वैंश्रवणायं कुर्महे । स मे कामान् कामकामांय

मह्यंम् । कामेश्वरो वैंश्रवणो दंदातु । कुबेरायं वैश्रवणायं । महाराजाय नमः ॥

श्रीविद्यादिमहामन्त्रमाहात्म्यपरिदर्शक ।

मन्त्रसारज्ञ भगवन् मन्त्रपुष्पं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – मन्त्रपुष्पं समर्पयामि ॥

## *प्रदक्षिणा*

ॐ यज्ञेनं यज्ञमंयजन्त देवाः । तानि धर्माणि प्रथमान्यांसन् ।

ते ह नाकं महिमानंस्सचन्ते । यत्र पूर्वे साध्यास्सन्तिं देवाः ॥

प्रदक्षिणीकृताशेष भारताजिर शङ्कर ।

प्रदक्षिणं करोमि त्वां प्रसन्नवदनाम्बुज ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः – अनन्तकोटि प्रदक्षिणनमस्कारान् समर्पयामि ॥

## *प्रसन्नार्घ्यम्*

ॐ तत्पुरुंषाय विद्महें महादेवायं धीमहि तन्नों रुद्रः प्रचोदयांत् ॥

प्रसन्नहृदयाम्भोज प्रपन्नार्तिप्रभञ्जन ।

प्रकृष्टज्ञानमाहात्म्य प्रसन्नार्घ्यं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - इदमर्घ्यमिदमर्घ्यमिदमर्घ्यम् ॥

## *प्रार्थना*

अनेकजन्मसम्प्राप्त कर्मबन्धविदाहिने । आत्मज्ञानप्रदानेन तस्मै श्रीगुरवे नमः ॥

ज्ञानं देहि यशो देहि विवेकं बुद्धिमेव च । वैराग्यं च शिवां विद्यां निर्मलां भक्तिमन्वहम् ॥

अद्वैतसारसर्वस्व संग्रहोत्सुकमानस । शिष्योपदेशप्रणयिन् प्रार्थनां ते समर्पये ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - प्रार्थयामि ॥

## *पुनः पूजा*

छत्रं धारयामि - चामरं वीजयामि - गीतं श्रावयामि -

वाद्यं घोषयामि - नृत्तं दर्शयामि - आन्दोलिकामारोपयामि -

अश्वमारोपयामि - गजमारोपयामि - रथमारोपयामि - ध्वजारोहणं समर्पयामि ॥

श्रीपूर्णातटिनीतरङ्गपटली पूरोदरोदित्वर

स्फीतांभःकण शीतलानिल परिस्पन्दाधिकानन्दित ।

कालट्याख्य पुरोल्लसच्छिवगुरुस्थान प्रदीपाङ्कुर

श्रीमच्छङ्करदेशिकोत्तम विभो ऋग्वेदमाकर्णय ॥

श्रीमत्कैलासाचलकृताधिवास श्रीपतिप्रमुखसुरवर प्रार्थित भूलोकवास ऋग्वेदप्रिय ऋग्वेदमवधारय ।

ॐ अग्निमींळे पुरोहिंतं यज्ञस्यं देवमृत्विजंम् । होतांरं रत्नधातंमम् ॥

कल्यातङ्क निरङ्कुशस्य जगतः कल्याणसन्दायक

ब्रह्मेन्द्रादि समस्तदेव निकुरुम्भाभ्यर्थना साधक ।

श्रीमत्कालटिपुण्यभूपरिसर प्राप्तावतारोज्ज्वल

विद्याराजकुलाब्धिचन्दिर यजुर्वेदं त्वमाकर्णय ॥

समाश्रित वृषाचलेश्वर स्वयम्भूलिङ्ग समादृत स्वाश्रित

भक्तजन प्रार्थनापूरण व्यतिषङ्ग यजुर्वेदप्रिय यजुर्वेदमवधारय ।

ॐ त्र्य॑म्बकं यजामहे सुग॒न्धिं पु॑ष्टि॒वर्ध॑नम् ।

उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ माऽमृता॑त् ॥

आर्याम्बा मुखपङ्कजार्क शिवगुर्वानन्दसन्दोहन

स्वाचार्याधिगताखिल श्रुतितते सच्छास्त्रपारङ्गत ।

ग्राहग्रासमिषात् स्वमातृकृतसन्यासाभ्यनुज्ञानुग

श्रीमच्छङ्कर सामवेदमधुना सानन्दमाकर्णय ॥

सफलीकृतार्याम्बाशिवगुरु मनोरथ विशदीकृतात्मविद्याविचार

विकलीकृतमन्मथ सामवेदप्रिय सामवेदमवधारय ।

ॐ अग्न॒ आया॑हि वी॒तये॑ गृणा॒नो ह॒व्यदा॑तये ।

नि होता॑ सत्सि ब॒र्हिषि॑ ॥

श्रीगोविन्दमुखोद्गत श्रुतिशिरोवाक्योपदेशादृत

श्रीविश्वेश्वर दर्शनोत्सुक विभो काशीनिवासप्रिय ।

सम्सारार्तसनन्दनादिकृतिनां सन्यासदीक्षागुरो

सामोदं त्वमथर्ववेदमधुना स्वामिन् समाकर्णय ॥

ॐ शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑ । शं

यो र॒भिस्र॑वन्तु नः ॥

गीतावाक्य ततेर्दशोपनिषदां श्रीव्याससूत्रावलेः

प्रस्थानत्रितयस्य निस्तुल महाभाष्यप्रणेतः प्रभो ।

वाराणस्युपसन्न शिष्यजनताभाष्योपदेशोत्सुक

स्वाधीनीकृत सर्वशास्त्रवितते शास्त्रं समाकर्णय ॥

निजपादाम्सु परिपावित कालटीक्षेत्र निजपुण्यावतार

परिष्कृतात्रेयगोत्र शास्त्रार्थप्रिय शास्त्रमवधारय ।

ॐ अथातो दर्शपूर्णमासौ व्याख्यास्यामः ।

प्रातरग्निहोत्रं हुत्वा अन्यमाहवनीयं प्रणीय अग्नीनन्वादधाति ॥

वृद्धब्राह्मण बादरायणकृतप्रश्नोत्तरात्युत्सुक

सूत्रौघ स्वरसार्थ वर्णन सुसंतुष्यन्मुनिश्लाघित ।

व्यासाज्ञावशतः स्वभाष्य विशदीकार प्रचारोद्यत

शुद्धाद्वैतमतप्रसारणपटो प्रीत्या पुराणं शृणु ॥

स्वमहिम सम्प्रापित सौवर्णवर्ष समुत्पादित

दीनतरद्विजसतीहर्ष पुराणपठनप्रिय पुराणमवधारय ।

ॐ परित्राणाय साधूनां विनाशाय च दुष्कृतां ।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

## *क्षमाप्रार्थना*

आवाहनं न जानामि न जानामि विसर्जनम् ।

पुजाविधिं न जानामि क्षमस्व गुरुसत्तम ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।

तस्मात्कारुण्यभावेन रक्ष रक्ष जगद्गुरो ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।

दासोऽयमिति मां मत्वा क्षमस्व गुरुपुङ्गव ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।

करोमि यद्यत्सकलं परस्मै श्रीशङ्करायेति समर्पयामि ॥

हृत्पद्मकर्णिकामध्यं स्वशिष्यैः सह शङ्कर ।

प्रविश त्वं महादेव सर्वलोकैकनायक ॥

*[इति निर्माल्यमाघ्राय स्तोत्रादिकं पठेत्]*

यस्य स्मृत्या च नामोक्त्या तपः पूजा कृयादिषु ।

न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जगद्गुरो ।

यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥

अनेन मया कृत पूजया श्रीशङ्करभगवत्पादाचार्यः प्रीयताम् ॥

मध्ये मन्त्र तन्त्र स्वर वर्ण ध्यान नियम न्यूनातिरिक्त लोपदोष प्रायश्चित्तार्थं नामत्रयजपमहं करिष्ये ॥

ॐ अच्युताय नमः ॐ अनन्ताय नमः ॐ गोविन्दाय नमः *[त्रिः]*

ॐ अच्युतानन्तगोविन्देभ्यो नमो नमः ॥

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।

यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

श्रीकृष्ण-कृष्ण-कृष्ण

ॐ हर ॐ हर ॐ हर

॥ श्रीमहात्रिपुरसुन्दरी चरणारविन्दार्पणमस्तु ॥

# श्री शङ्कराचार्य चतुर्विंशति नामावलिः

ॐ अष्टवर्षचतुर्वेदिने नमः।

ॐ द्वादशाखिलशास्त्रविदे नमः।

ॐ सर्वलोकख्यातशीलाय नमः।

ॐ प्रस्थानत्रयभाष्कृते नमः। ४

ॐ पद्मपादादिसच्छिष्याय नमः।

ॐ पाषण्डध्वान्त भास्कराय नमः।

ॐ अद्वैतस्थापनाचार्याय नमः।

ॐ द्वैतादिद्विपकेसरिने नमः। ८

ॐ व्यासनन्दितसिद्धान्ताय नमः।

ॐ वादनिर्जितमण्डनाय नमः।

ॐ षण्मतस्थापनाचार्याय नमः।

ॐ षड्गुणैश्वर्यमण्डिताय नमः। १२

ॐ सर्वलोकानुग्रहकृते नमः।

ॐ सर्वज्ञत्वादिभूषणाय नमः।

ॐ श्रुतिस्मृतिपुराणार्थाय नमः।

ॐ श्रुत्येकशरणप्रियाय नमः। १६

ॐ सकृत्स्मरणसन्तुष्टाय नमः।

ॐ शरणागतवत्सलाय नमः।

ॐ निर्व्याजकरुणामूर्तये नमः।

ॐ निरहंभावगोचराय नमः। २०

ॐ संशान्तभक्तहृत्तापाय नमः।

ॐ सर्वज्ञानफलप्रदाय नमः।

ॐ सदसद्वस्तुविमुखाय नमः।

ॐ सत्तासामान्यविग्रहाय नमः। २४

*॥ इति श्रीशङ्कराचार्य चतुर्विंशति नामावलिः समाप्तम् ॥*

# श्री शङ्कराचार्य सहस्रनामावलिः

ॐ गाढध्वान्तनिमज्जनप्रमुषितप्रज्ञानेत्रं परम्
नष्टप्रायमपास्तसर्वकरणं श्वासावशेषं जनम्।
द्राक्कारुण्यवशात्प्रबोधयति यो बोधांशुभिः प्राम्शुभिः
सोऽयं शङ्करदेशिकेन्द्रसविताऽस्माकं परं दैवतम्॥

अद्वैतेन्दुकलावतम्सरुचिरो विज्ञानगङ्गाधरो
हस्ताब्जाधृत दण्ड खण्ड परशू रुद्राक्षभूषोज्ज्वलः।
काषायामलकृत्तिवाससुभगः सम्सारमृत्युञ्जयो
द्वैताख्योग्रहलाहलाशनपटुः श्रीशङ्करः पातु नः॥

गुरवे सर्वलोकानां भिषजे भवरोगिणाम्।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः॥

जयतु जयतु नित्यं शङ्कराचार्यवर्यो
जयतु जयतु तस्याद्वैतविद्यानवद्या।
जयतु जयतु लोके तच्चरित्रं पवित्रं
जयतु जयतु भक्तिस्तत्पदाब्जे जनानाम्॥

ॐ श्री श्रीमत्कैलासनिलयाय नमः।
ॐ पार्वतीप्राणवल्लभाय नमः।
ॐ ब्रह्मादिसुरसम्पूज्याय नमः।
ॐ भक्तत्राणपरायणाय नमः।
ॐ बौद्धाक्रान्तमहीत्राणासक्तहृदे नमः।
ॐ सुरसंस्तुताय नमः।
ॐ कर्मकाण्डाविष्करणदक्षस्कन्दानुमोदकाय नमः।
ॐ नरदेहाद्दतमतये नमः।
ॐ संचोदितसुरावलये नमः।
ॐ तिष्याब्धत्रिकसाहस्रपरतो लब्धभूतलाय नमः॥१०॥
ॐ कालटीक्षेत्रनिवसदार्याम्बागर्भसंश्रयाय नमः।
ॐ शिवादिगुरुवंशाब्धिराकापूर्णसुधाकराय नमः।
ॐ शिवगुर्वात्मजाय नमः।
ॐ श्रीमते नमः।
ॐ सच्छिवांशावतारकाय नमः।
ॐ पितृदत्तान्वर्थभूतशङ्कराख्यसमुज्वलाय नमः।
ॐ ईश्वराब्धवसन्तर्तुराधाशुक्लसमुद्भवाय नमः।
ॐ आर्द्रानक्षत्रसंयुक्तपञ्चमीभानुसंजनये नमः।
ॐ विद्याधिराजसत्पौत्राय नमः।
ॐ विद्वन्मानसहर्षदाय नमः॥२०॥
ॐ प्रथमाब्धसमभ्यस्ताशेषभाषालिपिक्रमाय नमः।
ॐ वत्सरत्रितयादर्वाग्जनकावाप्तमुन्डनाय नमः।
ॐ तृतीयवत्सरप्राप्ततातविश्लेषकर्दमाय नमः।
ॐ मातृशोकापहारिणे नमः।
ॐ मातृशुश्रूषणादराय नमः।
ॐ मातृदेवाय नमः।
ॐ मातृगुरवे नमः।
ॐ मातृताताय नमः।
ॐ बाललीलादर्शनोत्थहर्षपूरितमातृकाय नमः।
ॐ सनाभिजनतो मात्राकारितद्विजसंस्कृतये नमः॥३०॥
ॐ विद्यागुरुकुलावासाय नमः।
ॐ गुरुसेवापरायणाय नमः।
ॐ त्रिपुण्ड्रविलसद्भालाय नमः।
ॐ धृतमौञ्जीमृगाजिनाय नमः।
ॐ पालाशदण्डपाणये नमः।
ॐ पीतकौपीनवासिताय नमः।
ॐ बिसतन्तुसद्दक्षाग्र्यसूत्रशोभितकंधराय नमः।
ॐ संध्याग्निसेवानिरताय नमः।

ॐ नियमाध्यायतत्पराय नमः।
ॐ भैक्ष्याशिने नमः॥४०॥
ॐ परमानन्दाय नमः।
ॐ सदा सर्वानन्दकराय नमः।
ॐ द्वित्रिमासाभ्यस्तविद्यासमानीकृतदेशिकाय नमः।
ॐ अभ्यस्तवेदवेदाङ्गाय नमः।
ॐ निखिलागपारगाय नमः।
ॐ दरिद्रब्राह्मणीदत्तभिक्षामलकतोषिताय नमः।
ॐ निर्भाग्यब्राह्मणीवाक्यश्रवणाकुलमानसाय नमः।
ॐ द्विजदारिद्यविश्रांतिवाञ्छासंस्मृतभार्गवये नमः।
ॐ स्वर्णधारास्तुतिप्रीतरमानुग्रहभाजनाय नमः।
ॐ स्वर्णामलकसद्वृष्टिप्रसादानन्दितद्विजाय नमः॥५०॥
ॐ तर्कशास्त्रविशारदाय नमः।
ॐ सांख्यशास्त्रविशारदाय नमः।
ॐ पातञ्जलनयाभिज्ञाय नमः।
ॐ भाट्टघट्टार्थतत्वविदे नमः।
ॐ सम्पूर्णविद्याय नमः।
ॐ सश्रीकाय नमः।
ॐ दत्तदेशिकदक्षिणाय नमः।
ॐ मातृसेवनसंसक्ताय नमः।
ॐ स्ववेश्मनिलयाय नमः।
ॐ सरिद्वर्तातपविश्रांतमातृदुःखापनोदकाय नमः।
ॐ वीजनाद्युपचाराप्तमातृसौख्यसुखोदयाय नमः।
ॐ सरिद्वेश्मोपसदनस्तुतिनन्दितनिमज्ञाय नमः॥६०॥
ॐ पूर्णादत्तवरोल्लासिगृहान्तिकसरिद्वराय नमः।
ॐ आनन्दाश्चर्यभरितचित्तमातृप्रसादभुवे नमः।
ॐ केरलाधिपसत्पुत्रवरदानसुरद्रुमाय नमः।
ॐ केरलाधीशरचितनाटकत्रयतोषिताय नमः।
ॐ राजोपनीतसौवर्णतुच्छीकृतमहामतये नमः।
ॐ स्वनिकेतसमायातदधीच्यत्र्यादिपूजकाय नमः।
ॐ आत्मतत्वविचारेण नन्दितातिथिमण्डलाय नमः।
ॐ कुम्भोद्भवज्ञातवृत्तशोकविह्वलमातृकाय नमः॥७०॥
ॐ सुतत्वबोधानुनयमातृचिन्तापनोदकृते नमः।
ॐ तुच्छसंसारविद्वेष्ट्रे नमः।
ॐ सत्यदर्शनलालसाय नमः।
ॐ तुर्याश्रमासक्तमतये नमः।
ॐ मातृशासनपालकाय नमः।
ॐ पूर्णानदीस्नानवेळा नक्रग्रस्तपदाम्बुजाय नमः।
ॐ सुतवात्सल्यशोकार्तजननीदत्त शासनाय नमः।
ॐ प्रैषोच्चारसंत्यक्तनक्रपीडाय नमः।
ॐ जितेन्द्रियाय नमः॥८०॥
ॐ जननीपादपाथोजरजःपूतकलेवराय नमः।
ॐ गुरूपसदानाकाङ्क्षिणे नमः।
ॐ अर्थिताम्बानुशासनाय नमः।
ॐ प्रतिज्ञातप्रसूदेहसंस्कारौजस्विसत्तमाय नमः।
ॐ चिन्तनामात्रसानिध्यबोधनाश्वासिताम्बकाय नमः।
ॐ सनाभिजनविन्यस्तमातृकाय नमः।
ॐ ममतापहृते नमः।
ॐ लब्धमात्राशीर्वचस्काय नमः।
ॐ मातृगेहाद्विनिर्गताय नमः।
ॐ सरित्तरङ्गसंत्रासानङ्गवाणीविबोधिताय नमः॥९०॥
ॐ स्वभुजोद्धृतगोपालमूर्तिपीडापहारकाय नमः।
ॐ ईतिबाधाविनिर्मुक्तदेशाधिष्ठितमूर्तिकाय नमः।
ॐ गोविन्दभगवत्पाददर्शनोद्यतमानसाय नमः।
ॐ अतिक्रान्तमहामार्गाय नमः।
ॐ नर्मदातटसंश्रिताय नमः।
ॐ त्वङ्गत्तरङ्गसन्दोहरेवास्नायिने नमः।
ॐ धृताम्बराय नमः।
ॐ भस्मोद्धूलितसर्वाङ्गाय नमः।
ॐ कृतसायह्निकक्रियाय नमः।
ॐ गोविन्दार्यगुहान्वेषतत्पराय नमः॥१००॥
ॐ गुरुभक्तिमते नमः।
ॐ गुहादर्शनसंजातहर्षपूर्णाश्रुलोचनाय नमः।
ॐ प्रदक्षिणीकृतगुहाय नमः।
ॐ द्वारन्यस्तनिजाङ्गकाय नमः।
ॐ बद्धमूर्धाञ्जलिपुटाय नमः।
ॐ स्तवतोषितदेशिकाय नमः।
ॐ विज्ञापितस्वात्मवृत्ताय नमः।
ॐ अर्थितब्रह्मदर्शनाय नमः।
ॐ स्तवप्रीतगुरुन्यस्तपादचुम्बितमस्तकाय नमः।
ॐ आर्यपादमुखावाप्तमहावाक्यचतुष्टयाय नमः॥११०॥
ॐ आचार्यबोधितात्मार्थाय नमः।
ॐ आचार्यप्रीतिदायकाय नमः।
ॐ गोविन्दभगवत्पादपाणिपङ्कजसंभवाय नमः।

ॐ निश्चिन्ताय नमः।
ॐ नियताहाराय नमः।
ॐ आत्मतत्वानुचिन्तकाय नमः।
ॐ प्रावृत्कालिकमार्गस्थप्राणिहिंसाभयार्दिताय नमः।
ॐ आचार्याङ्घ्रिकृतावासाय नमः।
ॐ आचार्याज्ञानुपालकाय नमः।
ॐ पञ्चाहोरात्रवर्षाम्बुमज्जज्जनभयापहृते नमः॥१२०॥
ॐ योगसिद्धिगृहीतेन्दुभवापूरकमण्डलाय नमः।
ॐ व्युत्थितार्यश्रुतिचरस्ववृत्तपरितोषिताय नमः।
ॐ व्याससूक्तिप्रत्यभिज्ञाबोधितात्मप्रशंसनाय नमः।
ॐ देशिकादेशवशगाय नमः।
ॐ सूत्रव्याकृतिकौतुकिने नमः।
ॐ गुर्वनुज्ञातविश्वेशदिदृक्षागमनोत्सुकाय नमः।
ॐ अवाप्तचन्द्रमौळीशनगराय नमः।
ॐ भक्तिसंयुताय नमः।
ॐ लसद्दण्डकराय नमः।
ॐ मुण्डिने नमः॥१३०॥
ॐ धृतकुण्डाय नमः।
ॐ धृतव्रताय नमः।
ॐ लज्जावरककौपीनकंथाच्छादितविग्रहाय नमः।
ॐ स्वीकृताम्बुपवित्राय नमः।
ॐ पादुकालसदङ्घ्रिकाय नमः।
ॐ गङ्गावारिकृतस्नानाय नमः।
ॐ प्रसन्नहृदयाम्बुजाय नमः।
ॐ अभिषिक्तपुरारातये नमः।
ॐ बिल्वतोषितविश्वपाय नमः।
ॐ हृद्यपद्यावलीप्रीतविश्वेशाय नमः॥१४०॥
ॐ नतविग्रहाय नमः।
ॐ गन्ङ्गापथिकचण्डालविदूरगमनोत्सुकाय नमः।
ॐ देहात्मभ्रमनिर्हारिचण्डालवचनादृताय नमः।
ॐ चण्डालाकारविश्वेशप्रश्नानुप्रश्नहर्षिताय नमः।
ॐ मनीषापञ्चकस्तोत्रनिर्माणनिपुणाय नमः।
ॐ महते नमः।
ॐ निजरूपसमायुक्तचन्द्रचूडालदर्शकाय नमः।
ॐ तद्दर्शनसमाह्लादनिर्वृतात्मने नमः।
ॐ निरामयाय नमः।
ॐ निराकाराय नमः॥१५०॥
ॐ निरातङ्काय नमः।
ॐ निर्ममाय नमः।
ॐ निर्गुणाय नमः।
ॐ विभवे नमः।
ॐ नित्यतृप्ताय नमः।
ॐ निजानन्दाय नमः।
ॐ निरावरणाय नमः।
ॐ ईश्वराय नमः।
ॐ नित्यशुद्धाय नमः।
ॐ नित्यबुद्धाय नमः॥१६०॥
ॐ नित्यबोधघनात्मकाय नमः।
ॐ ईशप्रसादभरिताय नमः।
ॐ ईश्वराराधनोत्सुकाय नमः।
ॐ वेदान्तसूत्रसद्भाष्यकरणप्रेरिताय नमः।
ॐ प्रभवे नमः।
ॐ इश्वराज्ञानुसरणपरिनिश्चितमानसाय नमः।
ॐ ईशान्तर्धानसंदर्शिने नमः।
ॐ विस्मयस्फरितेक्षणाय नमः।
ॐ जाह्नवीतटिनीस्नानपवित्रतरमूर्तिकाय नमः।
ॐ आह्निकानन्तध्यातगुरुपादसरोरुहाय नमः॥१७०॥
ॐ श्रुतियुक्तिस्वानुभूतिसामरस्यविचारणाय नमः।
ॐ लोकानुग्रहणैकान्तप्रवणस्वान्तसंयुताय नमः।
ॐ विश्वेशानुग्रहावाप्तभाष्यग्रथननैपुणाय नमः।
ॐ त्यक्तकाशीपुरीवासाय नमः।
ॐ बदर्याश्रमचिन्तकाय नमः।
ॐ तत्रत्यमुनिसन्दोहसंभाषणसुनिर्वृताय नमः।
ॐ नानातीर्थकृतस्नानाय नमः।
ॐ मार्गगामिने नमः।
ॐ मनोहराय नमः।
ॐ बदर्याश्रमसंदर्शनानन्दोद्रेकसंयुताय नमः॥१८०॥
ॐ करबिल्वीफलीभूतपरमाद्वैततत्वकाय नमः।
ॐ उन्मत्तकजगन्मोहनिवारणविचक्षणाय नमः।
ॐ प्रसन्नगम्भीरमाहाभाष्यनिर्माणकौतुकिने नमः।
ॐ श्रीमते नमः।
ॐ उपनिषद्भाष्यग्रथनप्रथनोत्सुकाय नमः।
ॐ गीताभाष्यामृतासारसन्तोषितजगत्त्रयाय नमः।
ॐ श्रीमत्सनत्सुजातीयमुखग्रन्थनिबन्धकाय नमः।

ॐ नृसिंहतापनीयादिभाष्योद्धारकृतादराय नमः।
ॐ असंख्यग्रन्थनिर्मात्रे नमः।
ॐ लोकानुग्रहकृते नमः॥१९०॥
ॐ सुधिये नमः।
ॐ सूत्रभाष्यमहायुक्तिखण्डिताखिलदुर्मताय नमः।
ॐ भाष्यान्तरान्धकारौघनिवारणदिवाकराय नमः।
ॐ स्वकृताशेषभाष्यादिग्रन्थाध्यापनतत्पराय नमः।
ॐ शान्तिदान्त्यादिसंयुक्तशिष्यमण्डलमण्डिताय नमः।
ॐ सनन्दनादिसच्छिष्यनित्याधीतस्वभाष्यकाय नमः।
ॐ त्रिरधीतात्मभाष्यश्रीसनन्दनसमाश्रिताय नमः।
ॐ जाह्नवीपरतीरस्थसनन्दनसमाह्वायिने नमः।
ॐ गङ्गोत्थकमलव्रातद्वारायातसनन्दनाय नमः।
ॐ आचार्यभक्तिमाहात्म्यनिदर्शनपरायणाय नमः॥२००॥
ॐ आनन्दमन्थरस्वान्तसनन्दनकृताननतये नमः।
ॐ तदीयाश्लेषसुहिताय नमः।
ॐ साधुमार्गनिदर्शकाय नमः।
ॐ दत्तपद्मपदाभिख्याय नमः।
ॐ भाष्याध्यापनतत्पराय नमः।
ॐ तत्तत्स्थलसमायातपण्डिताक्षेपखण्डकाय नमः।
ॐ नानाकुमतदुर्ध्वान्तध्वंसनोद्यतमानसाय नमः।
ॐ धीमते नमः।
ॐ अद्वैतसिद्धान्तसमर्थनसमुत्सुकाय नमः।
ॐ वेदान्तमहारण्यमध्यसञ्चारकेसरिणे नमः॥२१०॥
ॐ त्रय्यन्तनलिनीभृङ्गाय नमः।
ॐ त्रय्यन्ताम्भोजभास्कराय नमः।
ॐ अद्वैतामृतमाधुर्यसर्वस्वानुभवोद्यताय नमः।
ॐ अद्वैतमार्गसन्त्रात्रे नमः।
ॐ निर्द्वैतब्रह्मचिन्तकाय नमः।
ॐ द्वैतारण्यसमुच्छेदकुठाराय नमः।
ॐ निःसपत्नकाय नमः।
ॐ श्रौतस्मार्ताध्वनीनानुग्रहणैहपरायणाय नमः।
ॐ वावदूकबुधव्रातविस्थापनमहावचसे नमः।
ॐ स्वीयवाग्वैखरीलीलाविस्मापितबुधव्रजाय नमः॥२२०॥
ॐ श्लाघासहस्रसंश्रोत्रे नमः।
ॐ निर्विकाराय नमः।
ॐ गुणाकराय नमः।
ॐ त्रय्यन्तसारसर्वस्वसङ्ग्रहैकपरायणाय नमः।
ॐ त्रय्यन्तगूढपरमात्माख्यरत्नोद्धृतिक्षमाय नमः।
ॐ त्रय्यन्तभाष्यशीतांशुविशदीकृतभूतलाय नमः।
ॐ गङ्गाप्रवाहसदृशसूक्तिसाराय नमः।
ॐ महाशायाय नमः।
ॐ वितण्डिकाख्यवेतण्डखण्डाद्भुतपण्डिताय नमः।
ॐ भाष्यप्रचारनिरताय नमः॥२३०॥
ॐ भाष्यप्रवचनोत्सुकाय नमः।
ॐ भाष्यामृताब्धिमथनसम्पन्नज्ञानसारभाजे नमः।
ॐ भाष्यसारग्रहासक्तभक्तमुक्तिप्रदायकाय नमः।
ॐ भाष्याकारयशोराशिपवित्रितजगत्त्रयाय नमः।
ॐ भाष्यामृतास्वादलुब्धकर्मन्दिजनसेविताय नमः।
ॐ भाष्यरत्नप्रभाजालदेदीपितजगत्त्रयाय नमः।
ॐ भाष्यगङ्गाजलस्नातनिःशेषकलुषापहायाय नमः।
ॐ भाष्यगाम्भीर्यसंद्रष्टृजनविस्मयकारकाय नमः।
ॐ भाष्याम्भोनिधिनिर्मग्नभक्तकैवल्यदायकाय नमः।
ॐ भाष्यचन्द्रोदयोल्लासविद्ध्वस्तध्वान्तदक्षिणाय नमः।
ॐ भाष्याख्यकुमुदव्रातविकासनसुचन्द्रमसे नमः।
ॐ भाष्ययुक्तिकुठारौघनिकृत्तद्वैतदुर्द्रुमाय नमः।
ॐ भाष्यामृताब्धिलहरीविहारापरिखिन्नधिये नमः।
ॐ भाष्यसिद्धान्तसर्वस्वपेटिकायितमानसाय नमः।
ॐ भाष्याख्यनिकषग्रावशोधिताद्वैतकाञ्चनाय नमः।
ॐ भाष्यवैपुल्यगाम्भीर्यतिरस्कृतपयोनिधये नमः।
ॐ भाष्याभिधसुधावृष्टिपरिप्लावितभूतलाय नमः।
ॐ भाष्यपीयूषवर्षोन्मूलितसंतापसन्ततये नमः।
ॐ भाष्यतन्तुपरिप्रोतसद्युक्तिकुसुमावलये नमः॥२५०॥
ॐ वेदान्तवेद्यविभवाय नमः।
ॐ वेदान्तपरिनिष्ठिताय नमः।
ॐ वेदान्तवाक्यनिवहायार्थ्यपरिचिन्तकाय नमः।
ॐ वेदान्तवाक्यविलसद्दैदम्पर्यप्रदर्शकाय नमः।
ॐ वेदान्तवाक्यपीयूषस्यादिमाभिज्ञमानसाय नमः।
ॐ वेदान्तवाक्यकुसुमरसास्वादनबम्भराय नमः।
ॐ वेदान्तसारसर्वस्वनिधानायितचित्तभुवे नमः।
ॐ वेदान्तनलिनीहंसाय नमः।
ॐ वेदान्ताम्भोजभास्कराय नमः।
ॐ वेदान्तकुमुदोल्लाससुधानिधये नमः॥२६०॥
ॐ उदारधिये नमः।
ॐ वेदान्तशास्त्रसाहाय्यपराजितकुवादिकाय नमः।

ॐ वेदान्ताम्बोधिलहरीविहारपरिनिर्वृताय नमः।
ॐ शिष्यशङ्कापरिच्छेत्रे नमः।
ॐ शिष्याध्यापनतत्पराय नमः।
ॐ वृद्धवेषप्रतिच्छन्नव्यासाचार्यावलोकनाय नमः।
ॐ अध्याप्यमानविषयजिज्ञासुव्यासचोदिताय नमः।
ॐ शिष्यौघवर्णितस्वीयमाहात्म्याय नमः।
ॐ महिमाकराय नमः।
ॐ स्वसूत्रभाष्यश्रवणसंतुष्टव्यासनन्दिताय नमः॥२७०॥
ॐ पृष्टसूत्रार्थकाय नमः।
ॐ वाग्मिने नमः।
ॐ विनयोज्वलमानसाय नमः।
ॐ तदन्तरेत्यादिसूत्रप्रश्नहर्षितमानसाय नमः।
ॐ श्रुत्युपोद्बलितस्वीयवचोरञ्जितभूसुराय नमः।
ॐ भूतसूक्ष्मोपसृष्टजीवात्मगतिसाधकाय नमः।
ॐ ताण्डिश्रुतिगतप्रश्नोत्तरवाक्यनिदर्शकाय नमः।
ॐ शतधाकल्पितस्वीयपक्षाय नमः।
ॐ सर्वसमाधिकृते नमः।
ॐ वावदूकमहाविप्रपरमाश्चर्यदायकाय नमः॥२८०॥
ॐ तत्तत्प्रश्नसमाधानसन्तोषितमहामुनये नमः।
ॐ वेदावसानवाक्यौघसामरस्यकृते नमः।
ॐ अव्ययाय नमः।
ॐ दिनाष्टककृतासंख्यवादाय नमः।
ॐ विजयभाजनाय नमः।
ॐ विस्मयानन्दभरितश्रोतृश्लाघितवैभवाय नमः।
ॐ विष्णुशङ्करतावाचिपद्माङ्घ्रिप्रतिबोधिताय नमः।
ॐ पद्माङ्घ्रिप्रार्थितस्वीयवाग्व्यपारविरामकाय नमः।
ॐ तदीयवाक्यसारज्ञाय नमः।
ॐ नमस्कारसमुद्यताय नमः।
ॐ व्यासमाहात्म्यविज्ञात्रे नमः।
ॐ व्यासस्तुतिपरायणाय नमः।
ॐ नानापद्यावलीप्रीतव्यासानुग्रहभाजनाय नमः।
ॐ निजरूपसमायुक्तव्याससंदर्शनोत्सुकाय नमः।
ॐ तापिच्छमञ्जरीकान्तव्यासविग्रहदर्शकाय नमः।
ॐ शिष्यावलीपरिवृताय नमः।
ॐ प्रत्युद्गतिविधायकाय नमः।
ॐ स्वीयापराधशमनसमभ्यर्थनतत्पराय नमः।
ॐ बादरायणपादाब्जयुगलीस्पर्शनोद्यताय नमः॥३००॥
ॐ व्यासदर्शनजस्वीयकार्तार्थ्यप्रतिपादकाय नमः।
ॐ अष्टादशपुराणौघदुष्करत्वनिबोधकाय नमः।
ॐ तत्तादृशपुराणौघनिर्मातृत्वाभिनन्दकाय नमः।
ॐ परोपकारनैरत्यश्लाघकाय नमः।
ॐ व्यासपूजकाय नमः।
ॐ भिन्नशाखाचतुर्वेदविभागश्लाघकाय नमः।
ॐ महते नमः।
ॐ कलिकालीनमन्दात्मानुग्रहीतृत्वप्रदर्शकाय नमः।
ॐ नानाप्रबन्धकर्तृत्वजनिताश्चर्यबोधकाय नमः।
ॐ भारताख्यमहाग्रन्थदुष्करत्वप्रदर्शकाय नमः॥३१०॥
ॐ नारायणावतारत्वप्रदर्शिने नमः।
ॐ प्रार्थनोद्यताय नमः।
ॐ स्वानुग्रहैकफलकव्यासागमनशम्सकाय नमः।
ॐ स्वकीयभाष्यालोकार्थव्याससम्प्रार्थकाय नमः।
ॐ मुनये नमः।
ॐ निजभाष्यगगाम्भीर्यविस्मापितमहामुनये नमः।
ॐ भाष्यसर्वांशसंद्रष्टृव्यासाचार्याभिनन्दिताय नमः।
ॐ निजसिद्धान्तसर्वस्वद्रष्टृव्यासाभिपूजिताय नमः।
ॐ श्रुतिसूत्रसुसाङ्गत्यसंद्रष्टृव्यासपूजिताय नमः।
ॐ श्लाघावादसहस्रैकपात्रभूताय नमः॥३२०॥
ॐ महामुनये नमः।
ॐ गोविन्दयोगीशिष्यत्वश्लाघकव्यासपूजिताय नमः।
ॐ स्वशङ्करम्शतावादिव्यासवाक्यानुमोदकाय नमः।
ॐ व्यासाशयाविष्करणभाष्यप्रथनतत्पराय नमः।
ॐ सर्वसौभाग्यनिलयाय नमः।
ॐ सर्वसौख्यप्रदायकाय नमः।
ॐ सर्वज्ञाय नमः।
ॐ सर्वदृशे नमः।
ॐ साक्षिणे नमः।
ॐ सर्वतोमुखनैपुण्याय नमः॥३३०॥
ॐ सर्वकर्त्रे नमः।
ॐ सर्वगोप्त्रे नमः।
ॐ सर्ववैभवसंयुताय नमः।
ॐ सर्वभावविशेषज्ञाय नमः।
ॐ सर्वशास्त्रविशारदाय नमः।
ॐ सर्वाभीष्टप्रदाय नमः।
ॐ देवाय नमः।

ॐ सर्वदुःखनिवारणाय नमः।
ॐ सर्वसंशयविच्छेत्रे नमः।
ॐ सर्वसम्पत्प्रदायकाय नमः॥३४०॥
ॐ सर्वसौख्यविधात्रे नमः।
ॐ सर्वामरकृताननतये नमः।
ॐ सर्वर्षिगणसम्पूज्याय नमः।
ॐ सर्वमङ्गलकारणाय नमः।
ॐ सर्वदुःखापहाय नमः।
ॐ सौम्याय नमः।
ॐ सर्वान्तर्यमणाय नमः।
ॐ बलिने नमः।
ॐ सर्वाधाराय नमः।
ॐ सर्वगामिने नमः॥३५०॥
ॐ सर्वतोभद्रदायकाय नमः।
ॐ सर्वदुर्वादिदुर्गर्वखर्वीकरणकौतिकिने नमः।
ॐ सर्वलोकसुविख्यातयशोराशये नमः।
ॐ अमोघवाचे नमः।
ॐ सर्वभक्तसमुद्धर्त्रे नमः।
ॐ सर्वापद्विनिवारकाय नमः।
ॐ सार्वभौमादिहैरण्यगर्भान्तानन्दचिन्तकाय नमः।
ॐ भूयोग्रग्रन्थनिर्माणकृतव्यासार्यचोदनाय नमः।
ॐ भेदवादिनिराशार्थिव्यासवाक्यानुमोदकाय नमः।
ॐ यथागतस्वगमनबोधकव्यासचोदिताय नमः॥३६०॥
ॐ वेदान्तभाष्यरचनप्रचारादिविबोधकाय नमः।
ॐ स्वकीयकृतकृत्यत्वबोधकाय नमः।
ॐ प्रार्थनापराय नमः।
ॐ मणिकर्णीमहाक्षेत्रव्याससानिध्ययाचकाय नमः।
ॐ आत्मीयदेहसंत्यागप्रवृत्ताय नमः।
ॐ व्यासचोदकाय नमः।
ॐ निषिद्धदेहसंत्यागव्यासाज्ञापरिपालकाय नमः।
ॐ अनिर्जितानेकवादिजयसम्प्रेरिताय नमः।
ॐ सुखिने नमः।
ॐ अवतारमहाकार्यसम्पूर्णत्वानुचिन्तकाय नमः॥३७०॥
ॐ स्वसूत्रभाष्यमाधुर्यप्रीतव्यासकृतादराय नमः।
ॐ वरदानकृतोत्साहव्याससम्चोदिताय नमः।
ॐ कवये नमः।
ॐ विधिदत्तष्टसंख्याकवयसे नमः।
ॐ सन्न्याससंग्रहिणे नमः।
ॐ स्ववैदग्ध्याभिनिष्पन्नवयोष्टककृताश्रयाय नमः।
ॐ व्यासाज्ञावैभवोत्पन्नषोडशाब्दाय नमः।
ॐ शिवङ्कराय नमः।
ॐ श्रुतिसूत्रमहाभाष्यत्रिवेण्युत्पत्तिभुवे नमः।
ॐ शिवाय नमः॥३८०॥
ॐ वेदव्यासपदाम्भोजयुगलीस्पर्शनिर्वृताय नमः।
ॐ भक्तिगर्भितवाक्यौघकुसुमाञ्जलिदायकाय नमः।
ॐ व्यासदत्तवरग्राहिणे नमः।
ॐ व्यासान्तर्धानदर्शकाय नमः।
ॐ बादरायणविश्लेषव्यसनातुरमानसाय नमः।
ॐ व्याससंचोदिताशेषदिग्विजयैककृतोद्यमाय नमः।
ॐ कुमारिलावलोकेच्छवे नमः।
ॐ दक्षिणाशागमोद्यताय नमः।
ॐ भट्टपादापराभिख्यकुमारिलजयोत्सुकाय नमः।
ॐ प्रयागगमनोद्युक्ताय नमः॥३९०॥
ॐ त्रिवेणीसङ्गमस्नानपवित्रतरमूर्तिकाय नमः।
ॐ गङ्गातुङ्गतरङ्गौघदर्शनप्रीतमानसाय नमः।
ॐ हृद्यानवद्यपद्यौघसंस्तुताभ्रसरिद्वराय नमः।
ॐ भूयोभूयःकृतस्नानाय नमः।
ॐ दण्डालङ्कृतहस्तकाय नमः।
ॐ नानाघमर्षमन्त्रानुपाठकाय नमः।
ॐ ध्यानतत्पराय नमः।
ॐ नानामन्त्रजपप्रीताय नमः।
ॐ मन्त्रसारज्ञाय नमः।
ॐ उत्तमाय नमः॥४००॥
ॐ मन्त्रार्थव्याकृतिक्षमाय नमः।
ॐ मन्त्रमाणिक्यमञ्जूषायितचेतःप्रदेशकाय नमः।
ॐ मन्त्ररत्नाकराय नमः।
ॐ मानिने नमः।
ॐ मन्त्रवैभवदर्शकाय नमः।
ॐ मन्त्रशास्त्रार्थतत्वज्ञाय नमः।
ॐ मन्त्रशास्त्रप्रवर्तकाय नमः।
ॐ मान्त्रिकाग्रेसराय नमः॥४१०॥
ॐ मान्याय नमः।
ॐ मन्त्राम्भोरुहषट्पदाय नमः।
ॐ मन्त्रकाननसञ्चारकेसरिणे नमः।

ॐ मन्त्रतत्पराय नमः।
ॐ मन्त्राभिधसुकासारकलहंसाय नमः।
ॐ महामतये नमः।
ॐ मन्त्रसंशयविच्छेत्रे नमः।
ॐ मन्त्रजातोपदेशकाय नमः।
ॐ स्नानकालसमायातमातृस्मृतये नमः।
ॐ अमोघधिये नमः॥४२०॥
ॐ आह्निकानुष्ठितिव्यग्राय नमः।
ॐ यतिधर्मपरायणाय नमः।
ॐ एकान्तमतये नमः।
ॐ एकान्तशीलाय नमः।
ॐ एकान्तसंश्रिताय नमः।
ॐ भट्टपादतुषाङ्गारावेशवृत्तनिशामकाय नमः।
ॐ भाष्यवार्तिकनिर्माणमनोरथसमीरिताय नमः।
ॐ भट्टपादीयवृत्तान्तप्रत्यक्षीकरणोत्सुकाय नमः।
ॐ कुमारिलसमालोकलालसाय नमः।
ॐ गमनोत्सुकाय नमः॥४३०॥
ॐ तुषाग्निराशिमध्यस्थभट्टपादावलोकनाय नमः।
ॐ प्रभाकरादिसच्छिष्यावृततन्मूर्तिदर्शकाय नमः।
ॐ तुषाग्निस्थिततद्वक्त्रप्रसादालोकविस्मिताय नमः।
ॐ अतर्कितागतप्रीतभट्टपादाभिनन्दिताय नमः।
ॐ भट्टपादीयसच्छिष्यकृतनानोपचारकाय नमः।
ॐ अन्त्यकालस्वसानिध्यसन्तोषितकुमारिलाय नमः।
ॐ निजदर्शनसन्तुष्टभट्टपादाभिनन्दिताय नमः।
ॐ सत्सङ्गमनमाहत्म्यवादिभट्टाभिपूजिताय नमः।
ॐ संसारानित्यतावाचिभट्टशोकानुशोचकाय नमः।
ॐ कालानैय्यत्यसंबोधिभट्टपादोक्तिशम्सनाय नमः॥४४०॥
ॐ ईशापह्नवजात्यन्तदोषवादसुसंश्रविणे नमः।
ॐ बौद्धान्तेवासिताबोधिभट्टवाक्यप्रशम्सकाय नमः।
ॐ भट्टपादीयसौधाग्रपतनाकर्णनातुराय नमः।
ॐ वेदभक्तिप्रयुक्त्यैतत्क्षताभावनिशामकाय नमः।
ॐ एकचक्षुःक्षतप्राप्तिशोचद्भट्टानुशोचकाय नमः।
ॐ गुरुद्रोहाख्यदुरितसम्भवाकर्णनातुराय नमः।
ॐ प्रायश्चित्तार्थरचिततुषाग्न्यावेशदर्शकाय नमः।
ॐ स्वदर्शनजकार्तार्थ्यबोधिभट्टोक्तिपूजिताय नमः।
ॐ स्वभाष्यवृत्तिरचनभाग्याभावोक्तिसंश्रविणे नमः।
ॐ तत्प्रयुक्तयशोऽभावबोधिभट्टानुशोचकाय नमः॥४५०॥
ॐ निजावताराभिज्ञप्तिबोधिभट्टोक्तिशम्सनाय नमः।
ॐ सुब्रह्मण्यावतारत्वबोधकाय नमः।
ॐ श्लाघनापराय नमः।
ॐ कर्मकाण्डप्रतिष्ठार्थतदीयागमबोधकाय नमः।
ॐ साधुमार्गानुशिक्षार्थतदीयव्रतबोधकाय नमः।
ॐ करकाम्बुकणासेकजीवनोत्सुकमानसाय नमः।
ॐ लोकापवादासह्यत्वबोधिभट्टानुसारकृते नमः।
ॐ आगमोक्तव्रतैकान्तनिष्ठभट्टानुमोदकाय नमः।
ॐ आगमोक्त्यतिलङ्घित्वदुष्कीर्तिपरिहारकृते नमः।
ॐ स्वकीयकृतकृत्यत्वाकाङ्क्षिभट्टानुसेविकाय नमः॥४६०॥
ॐ तारकाख्यब्रह्मविद्यापेक्षिभट्टाभिलाषकृते नमः।
ॐ मण्डनाख्यमहासूरिविजयप्रेरिताय नमः।
ॐ सुहृदे नमः।
ॐ तत्पाण्डित्यगुणश्लाघिभट्टपादप्रणोदिताय नमः।
ॐ प्रवृत्तिमार्गनिरततद्वृत्तान्तनिशामकाय नमः।
ॐ मण्डनार्यजयोद्योगकर्तव्योक्तिसुसूचकाय नमः।
ॐ दुर्वासःशापसंजातवाणीस्थितिनिशामकाय नमः।
ॐ भट्टान्तेवासिमुख्यत्वाभिज्ञाय नमः।
ॐ विज्ञानसागराय नमः।
ॐ भारतीसाक्षिकानेकविवादकरणेरिताय नमः॥४७०॥
ॐ तदीयजयमात्रान्यजयप्राप्तिनिशामकाय नमः।
ॐ वार्तिकग्रन्थकरणयोग्यताश्रवणादृताय नमः।
ॐ मुहूर्तमात्रसानिध्यप्रार्थिभट्टानुमोदकाय नमः।
ॐ तारकब्रह्मकथनकृतार्थितकुमारिलाय नमः।
ॐ परमाद्वैततत्वज्ञभट्टपादानुचिन्तिताय नमः।
ॐ भट्टानुग्रहणोद्युक्ताय नमः।
ॐ विष्णुधामप्रवेशकाय नमः।
ॐ आकाशमार्गसम्प्राप्तमण्डनीयनिवेशनाय नमः।
ॐ माहिष्मत्याख्यनगरीरामणीयकदर्शनाय नमः।
ॐ रेवावारिकणोन्मिश्रवातधूताखिलाश्रमाय नमः॥४८०॥
ॐ रेवानदीकृतस्नानाय नमः।
ॐ नित्याह्नीकपरायणाय नमः।
ॐ दृगध्वनीनतद्दासीदर्शनाय नमः।
ॐ महिमान्विताय नमः।
ॐ मण्डनीयमहासद्ममार्गप्रष्ट्रे नमः।
ॐ महायशसे नमः।
ॐ विस्मयाकुलतद्दासीदत्तोत्तराय नमः।

ॐ उदारवाचे नमः।
ॐ स्वतःप्रामाण्यादिवादिशुकसूचिततद्गृहाय नमः।
ॐ कर्मेश्वरादिसंवादिशुकसूचिततद्गृहाय नमः॥४९०॥
ॐ जगद्ध्रुवत्वादिवादिशुकसूचितसद्मकाय नमः।
ॐ द्वारस्थनीडसंरुद्धशुकोक्तिश्लाघनापराय नमः।
ॐ यथोक्तचिह्नविज्ञातमण्डनीयनिवेशनाय नमः।
ॐ कवाटगुप्तिदुर्वेशगृहान्तर्गतिचिन्तकाय नमः।
ॐ योगमाहात्म्यरचितव्योममार्गातिलंघनाय नमः।
ॐ अङ्गणान्तःसमुत्पातिने नमः।
ॐ परितो दृष्टसद्मकाय नमः।
ॐ अभ्रंलिहमहासद्मरामणीयकदर्शनाय नमः।
ॐ पद्मजन्मांशसम्भूतमण्डनार्यावलोकनाय नमः।
ॐ निमन्त्रितव्यासजैमिन्यङ्घ्रिक्षालनदर्शकाय नमः॥५००॥
ॐ व्यासजैमिनिसाङ्गत्यदर्शनात्यन्तविस्मिताय नमः।
ॐ तत्कालकृतसान्निध्यव्यासजैमिनिमानिताय नमः।
ॐ अकस्माद्यतिसम्प्राप्तिकृद्धमण्डनवीक्षिताय नमः।
ॐ प्रवृत्तिमार्गनिरतमण्डनार्यविमानिताय नमः।
ॐ सोपालम्भतदीयोक्तिसमाधानविचक्षणाय नमः।
ॐ मण्डनीयाखिलप्रश्नोत्तरदानविदग्धधिये नमः।
ॐ वक्रोक्तिजालचातुर्यनिरुत्तरितमण्डनाय नमः।
ॐ यतिनिन्दादोषबोधिव्यासवाक्यनिशामकाय नमः।
ॐ साक्षाद्विष्णुस्वरूपत्वबोधकव्यासदर्शकाय नमः।
ॐ व्यासाज्ञावाक्यवशगमण्डनार्यनिमन्त्रिताय नमः॥५१०॥
ॐ मण्डनार्यकृतानेकसपर्याविधिभाजनाय नमः।
ॐ भैक्षार्थरचिताह्वानाय नमः।
ॐ वादभिक्षैकयाचकाय नमः।
ॐ विवादभिक्षामात्रार्थिस्वागमप्रतिबोधकाय नमः।
ॐ अन्योन्यशिष्यताप्राप्तिपणबन्धप्रदर्शकाय नमः।
ॐ अनादृताहारभिक्षाय नमः।
ॐ वादभिक्षापरायणाय नमः।
ॐ श्रुत्यन्तमार्गविस्तारमात्राकङ्क्षित्वबोधकाय नमः।
ॐ विस्मयानन्दभरितमण्डनार्यप्रशम्सिताय नमः।
ॐ चिराकाङ्क्षितसद्वादकथातोषितमण्डनाय नमः॥५२०॥
ॐ वादभिक्षाकृतोद्योगमण्डनार्यप्रशम्सकाय नमः।
ॐ विवादसाक्षिशून्यत्वबोधिमण्डनचोदिताय नमः।
ॐ मुनिद्वयीसाक्षितार्थिमण्डनार्यप्रशम्सकाय नमः।
ॐ भारतीकृतमाध्यस्थ्यवादलोलुपमानसाय नमः।
ॐ प्रतिज्ञापणबन्धादिजिज्ञासुत्वप्रदर्शकाय नमः।
ॐ मण्डनार्यकृतासंख्यवीजनाद्युपचारकाय नमः।
ॐ व्यासजैमिनिसान्निध्यसम्भाषणपरायणाय नमः।
ॐ मुनिद्वयान्तर्धिदर्शिने नमः।
ॐ द्विजेन्द्रालयनिर्गताय नमः॥५३०॥
ॐ रेवानदीसमीपस्थदेवालयनिवासकृते नमः।
ॐ निजशिष्यजनैकान्तसम्भाषणपरायणाय नमः।
ॐ श्राविताशेषविषयशिष्यावलिसमाश्रिताय नमः।
ॐ व्यासजैमिनिसान्निध्यदुरापत्वानुचिन्तकाय नमः।
ॐ त्रियामानिर्गमाकाङ्क्षिणे नमः।
ॐ प्रातःस्नानपरायणाय नमः।
ॐ कृताह्निकक्रियाय नमः।
ॐ शिष्यमण्डलीपरिमण्डिताय नमः।
ॐ मण्डनार्यमहासद्ममण्डनायितमूर्तिकाय नमः।
ॐ विवादार्थकृतैकान्तनिश्चयाय नमः॥५४०॥
ॐ मण्डनादृताय नमः।
ॐ सदस्यभावविलसद्वाणीसान्निध्यदर्शकाय नमः।
ॐ विवादकृतिसन्नद्धमण्डनार्यप्रशम्सकाय नमः।
ॐ सदस्यवादिसम्योगसमाह्लादितमानसाय नमः।
ॐ प्रतिज्ञाकरणोत्साहिने नमः।
ॐ वेदान्ताशयसूचकाय नमः।
ॐ विश्वाकारसमाभातब्रह्मैकत्वप्रदर्शकाय नमः।
ॐ शुक्तिरूप्यादिदृष्टान्तप्रत्यायितमृषात्मकाय नमः।
ॐ ब्रह्मज्ञानैकसम्प्राप्यस्वात्मसंस्थितिबोधकाय नमः॥५५०॥
ॐ पुनर्जन्मापरामृष्टकैवल्यप्रतिपादकाय नमः।
ॐ त्रयीमस्तकसन्दोहप्रामाण्योद्घाटनापराय नमः।
ॐ पराजितस्वसम्प्राप्यशुक्लवस्त्रत्वबोधकाय नमः।
ॐ जयापजयपक्षीयवाणीसाक्षित्वबोधकाय नमः।
ॐ विश्वरूपीयसकलप्रतिज्ञाश्रवणोत्सुकाय नमः।
ॐ वेदान्तामानताबोधितद्वाक्यश्रवणातुराय नमः।
ॐ कर्मकाण्डीयवचनप्रामाण्याकर्णनाकुलाय नमः।
ॐ क्रियायोगिवचोमात्रप्रामाण्याकर्णनक्षमाय नमः।
ॐ कर्मसम्प्राप्यकैवल्यबोधिमण्डनदर्शकाय नमः॥५६०॥
ॐ यावदायुःकर्मजालकर्तव्यत्वोक्तिसंश्रविणे नमः।
ॐ पराजितस्वकाषायग्रहवाक्यानुमोदकाय नमः।
ॐ भारतीसाक्षिकासंख्यवादोद्युक्ताय नमः।
ॐ यतीश्वराय नमः।

ॐ दैनन्दिनाह्निकोपान्तसमारब्धविवादकाय नमः।
ॐ भारतीनिहितस्वीयगलालम्बिसुमालिकाय नमः।
ॐ मण्डनीयगलालम्बिमालालालित्यदर्शकाय नमः।
ॐ मालामालिन्यनिर्णेयपराजयनिशामकाय नमः।
ॐ गृहकर्मसमासक्तवाणीदत्तसुभैक्ष्यकाय नमः।
ॐ भिक्षोत्तरक्षणारब्धविवादापरिखिन्नधिये नमः॥५७०॥
ॐ ऊर्ध्वोपविष्टब्रह्मादिपीतस्वीयवचोऽमृताय नमः।
ॐ क्रोधवाक्फलजात्यादिदोषशून्यमहावचसे नमः।
ॐ अद्वैतखण्डनोद्युक्तमण्डनीयोक्तिखण्डनाय नमः।
ॐ जीवेश्वरजगद्भेदवादभेदनलालसाय नमः।
ॐ उद्दालकश्वेतकेतुसंवादादिनिदर्शकाय नमः।
ॐ तत्त्वमस्यादिवाक्यौघस्वारस्यप्रतिपादकाय नमः।
ॐ विधिशेषत्ववचननिर्मूलत्वप्रदर्शकाय नमः।
ॐ भिन्नप्रकरणोपात्ततत्तात्पर्यप्रदर्शकाय नमः।
ॐ उपासनार्थतावादनिर्मूलनपरायणाय नमः।
ॐ केवलाद्वैतविश्रान्तवाक्यतात्पर्यदर्शकाय नमः।
ॐ सच्चिदानन्दरूपात्मप्रतिपादनतत्पराय नमः॥५८०॥
ॐ जपमात्रोपयोगित्वनिर्युक्तित्वानुदर्शकाय नमः।
ॐ अभेदबोधिवाक्यौघप्राबल्यपरिदर्शकाय नमः।
ॐ भेदबुद्धिप्रमाणत्वसर्वांशोन्मूलनक्षमाय नमः।
ॐ भेदसंदर्शिवाक्यौघप्रामाण्याभावसाधकाय नमः।
ॐ भेदप्रत्यक्ष्यदौर्बल्यप्रतिपादनतत्पराय नमः।
ॐ भेदनिन्दासहस्रोक्तितात्पर्यप्रतिपादकाय नमः।
ॐ लोकप्रसिद्धभेदानुवादकत्वप्रदर्शकाय नमः।
ॐ अप्रसिद्धाद्वैतबोधिवाक्यप्रामाण्यसाधकाय नमः।
ॐ नानादृष्टान्तसंदर्शिने नमः।
ॐ श्रुतिवाक्यनिदर्शकाय नमः॥५९०॥
ॐ युक्तिसाहस्रघटितस्वानुभूतिप्रदर्शकाय नमः।
ॐ श्रुतियुक्तिसुसौहार्ददर्शकाय नमः।
ॐ वीतमत्सराय नमः।
ॐ हेतुदोषांशसंदर्शिमण्डनाक्षेपखण्डनाय नमः।
ॐ भेदौपाधिकताबोधिने नमः।
ॐ सत्याद्वैतानुदर्शकाय नमः।
ॐ असम्सारिपरब्रह्मसाधनैकान्तमानसाय नमः।
ॐ क्षेत्रज्ञपरमात्मैक्यवादिगीतादिनिदर्शकाय नमः।
ॐ अध्यारोपापवादाप्तनिष्प्रपञ्चत्वदर्शकाय नमः।
ॐ युक्तिसाहस्ररचितदुर्वादिमतखण्डनाय नमः॥६००॥
ॐ मण्डनीयगलालम्बिमालामालिन्यदर्शकाय नमः।
ॐ पुष्पवृष्टिसंछन्नाय नमः।
ॐ भारतीप्रतिनन्दिताय नमः।
ॐ भिक्षाकालोपसम्प्राप्तभारतीपरिदर्शकाय नमः।
ॐ उभयाह्वानकृद्वाणीवैदग्ध्यश्लाघनापराय नमः।
ॐ भारतीबोधितस्वीयदुर्वासःशापसंश्रविणे नमः।
ॐ जयावधिकतच्छापवृत्तान्ताकर्णनाय नमः।
ॐ वशिने नमः।
ॐ स्वधामगमनोद्युक्तभारतीप्रतिरोधकाय नमः।
ॐ वनदुर्गामहामन्त्रकृतवाणीसुबाधनाय नमः॥६१०॥
ॐ सरस्वत्यवतारत्वबोधकाय नमः।
ॐ वेदविद्वराय नमः।
ॐ भक्तिमत्परतन्त्रत्वबोधकाय नमः।
ॐ विनयोज्वलाय नमः।
ॐ स्वानुज्ञावधिभूलोकनिवासप्रार्थनापराय नमः।
ॐ मण्डनीयाशयज्ञानप्रवृत्ताय नमः।
ॐ विगतस्पृहाय नमः।
ॐ कर्मजाड्यपराभूततत्सन्देहापनोदकाय नमः।
ॐ निजापजयसंजातदुःखाभावोक्तिसंश्रविणे नमः।
ॐ जैमिन्युक्तिनिराशानुशोचन्मण्डनबोधकाय नमः॥६२०॥
ॐ कामनावदनुग्राहिजैमिन्याशयबोधकाय नमः।
ॐ कर्मप्रणाडीमात्रत्वबोधिने नमः।
ॐ जैमिनिसम्मताय नमः।
ॐ साक्षान्मोक्षैकफलकज्ञानवाचिने नमः।
ॐ महावचसे नमः।
ॐ कर्मौघफलदातृत्वानुपपत्तिप्रपञ्चकाय नमः।
ॐ ईशैकफलदातृत्वसाधकाय नमः।
ॐ युक्तिबोधकाय नमः।
ॐ जैमिनीयवचोजालतात्पर्योद्घाटनक्षमाय नमः।
ॐ अनुमेयेश्वराभावमात्रतात्पर्यसूचकाय नमः।
ॐ वेदैकगम्येशवादिजैमिन्याशयसूचकाय नमः।
ॐ डोलायमानहृदयमण्डनार्यावलोकनाय नमः।
ॐ तत्सन्देहापनोदार्थागतजैमिनिशम्सकाय नमः।
ॐ स्वोक्तसर्वांशसाधुत्वबोधिजैमिनिशम्सकाय नमः।
ॐ जैमिन्युदितसर्वज्ञभावाय नमः।
ॐ जैमिनिपूजिताय नमः।
ॐ निजावतारसंसूचिजैमिनिप्रतिनन्दिताय नमः।

ॐ जैमिनिव्यासवचनतात्पर्यांशप्रदर्शकाय नमः।
ॐ जैमिन्यन्तर्धिसंदर्शिने नमः।
ॐ सर्वतो जयभाजनाय नमः॥६४०॥
ॐ साष्टाङ्गपातप्रणतमण्डनार्यप्रसादकृते नमः।
ॐ स्वीयावतारताभिज्ञमण्डनार्याभिनन्दिताय नमः।
ॐ स्वानभिज्ञत्वानुशोचिमण्डनार्यप्रसंसकाय नमः।
ॐ स्वकर्मजाड्यानुशोचन्मण्डनोक्त्यभिनन्दकाय नमः।
ॐ सम्सारतापसम्बोधिमण्डनोक्त्यभिनन्दकाय नमः।
ॐ परमानन्दलहरीविहरन्मण्डनादृताय नमः।
ॐ स्वाज्ञानतिमिरापायबोधिमण्डनशम्सकाय नमः।
ॐ अविद्याराक्षसीग्रस्तपरमात्मोद्धृतिक्षमाय नमः।
ॐ स्वापराधक्षमापेक्षिमण्डनार्याभियाचिताय नमः।
ॐ मण्डनार्यकृतस्वीयावतारत्वसमर्थनाय नमः॥६५०॥
ॐ पूर्वार्जितस्वसुकृतश्लाघिमण्डनपूजिताय नमः।
ॐ स्वसंवादातिसन्तुष्टमण्डनाधिकनन्दिताय नमः।
ॐ स्वसंवादातिदौर्लभ्यबोधिमण्डनशम्सकाय नमः।
ॐ नानास्तुतिवचोगुंफसन्तुष्टस्वान्तसम्युताय नमः।
ॐ मण्डनार्यकृतासंख्यनमोवाकप्रशंसनाय नमः।
ॐ मण्डनारचितस्तोकस्तुतिसाहस्रभाजनाय नमः।
ॐ स्वपादशरणापन्नमण्डनानुग्रहोत्सुकाय नमः।
ॐ निजकिङ्करताबोधिमण्डनोक्तिप्रशम्सकाय नमः।
ॐ मण्डनीयमहाभक्तितरलीकृतमानसाय नमः।
ॐ तदीयजन्मसाफल्यापादनोद्यतमानसाय नमः॥६६०॥
ॐ सुतदारगृहत्यागासक्तमण्डनशम्सकाय नमः।
ॐ मण्डनीयकलत्रानुमतिसम्पादनोत्सुकाय नमः।
ॐ मुन्युक्तसर्ववृत्तज्ञवाणीसमनुमोदिताय नमः।
ॐ मण्डनप्राप्तशिष्यत्वाबोधिवाणीप्रशम्सकाय नमः।
ॐ मुन्युक्तसर्ववृत्तान्तयाथार्थ्यपरिचिन्तकाय नमः।
ॐ समग्रविजयाभावबोधिवाण्युक्तिचिन्तकाय नमः।
ॐ निजार्धभागतावाचिवाणिप्रागल्भ्यचिन्तकाय नमः।
ॐ महिलाजनसंवाददोषोद्घाटनतत्पराय नमः।
ॐ याज्ञवल्क्यस्त्रीविवाददर्शिवाण्युक्तिपूजकाय नमः।
ॐ सुलभाजनकाद्युक्तिप्रत्युक्तिपरिचिन्तकाय नमः॥६७०॥
ॐ विद्वत्सभामध्यवर्तिने नमः।
ॐ वाणीसंवादकाय नमः।
ॐ वाग्झरीमाधुरीयोगदूरीकृतसुधारसाय नमः।
ॐ भारतीचिन्तिताशेषशास्त्राजय्यत्ववैभवाय नमः।
ॐ अतिबाल्यकृतसन्यासाय नमः।
ॐ विषयौघपराङ्ग्मुखाय नमः।
ॐ कामशास्त्रकृतप्रश्नाय नमः।
ॐ चिन्तनापरमानसाय नमः।
ॐ जनापवादचकिताय नमः।
ॐ यतिधर्मप्रवर्तकाय नमः॥६८०॥
ॐ कामशास्त्रानभिज्ञत्वबहिःप्रकटनोद्यताय नमः।
ॐ मासमात्रावधिप्रार्थिने नमः।
ॐ वाण्यनुज्ञाताय नमः।
ॐ आत्मवते नमः।
ॐ गमनार्थकृतोद्योगाय नमः।
ॐ शिष्यावलिपरिष्कृताय नमः।
ॐ योगशक्तिकृताकाशसञ्चाराय नमः।
ॐ योगतत्वविदे नमः।
ॐ गतचेतनभूपालगात्रदर्शिने नमः।
ॐ प्रहृष्टधिये नमः।
ॐ प्रमदाजनसंवीतराजकायप्रदर्शकाय नमः।
ॐ तच्छरीरनुप्रवेशसमुत्सुकितमानसाय नमः।
ॐ सनन्दनादिसच्छिष्यसमापृच्छापरायणाय नमः।
ॐ भक्तिमत्तरपद्माङ्घ्रिनिषिद्धगमनाय नमः।
ॐ व्रतिने नमः।
ॐ सनन्दनोक्तविषयाकर्षकत्वस्वभावकाय नमः।
ॐ ऊर्ध्वरेतोव्रतापोहशङ्किपद्माङ्घ्रिबोधकाय नमः।
ॐ सन्यासधर्मशैथिल्याशङ्किपद्माङ्घ्रिवारिताय नमः।
ॐ देहाभिमानवन्मात्रपापसम्भवबोधकाय नमः।
ॐ निरहङ्कारकर्मौघलेपाभावावबोधकाय नमः॥७००॥
ॐ गुहाहितात्मीयदेहरक्षणीयत्वबोधकाय नमः।
ॐ सम्प्राप्तामरकाभिख्यराजदेहाय नमः।
ॐ विशेषविदे नमः।
ॐ निजप्रवेशचलितराजकीयशरीरभृते नमः।
ॐ अकस्माज्जीवसम्प्राप्तिविस्मापिततदङ्गनाय नमः।
ॐ प्रभूतहर्षवनिताव्यूहसन्दर्शनोत्सुकाय नमः।
ॐ विस्मयानन्दभरितमन्त्रिमुख्याभिनन्दिताय नमः।
ॐ शङ्खदुन्दुभिनिर्घोषसमाकर्णनतत्पराय नमः॥७१०॥
ॐ समस्तजनतानन्दजनकाय नमः।
ॐ मङ्गलप्रदाय नमः।
ॐ पुरोहितकृतस्वीयशान्तिकर्मणे नमः।

ॐ शमावनये नमः।
ॐ कृतमाङ्गलिकाय नमः।
ॐ भद्रगजारूढाय नमः।
ॐ निरीहिताय नमः।
ॐ सचिवादिकृतस्वीयसत्काराय नमः।
ॐ साधुसम्मताय नमः।
ॐ पृथिवीपालनोद्युक्ताय नमः।
ॐ धर्माधर्मविशेषविदे नमः॥७२०॥
ॐ नीतिमार्गसुनिष्णात्रे नमः।
ॐ राजकार्यानुपालकाय नमः।
ॐ निजौदार्यादिजनितमन्त्रिसंशयभाजनाय नमः।
ॐ स्वकीयगुणसन्दोहसमाह्लादितसज्जनाय नमः।
ॐ परकायप्रवेष्ट्यत्वज्ञातृमन्त्रिप्रपूजिताय नमः।
ॐ मन्त्रिविन्यस्तनिखिलराज्यभाराय नमः।
ॐ धराधिपाय नमः।
ॐ अन्तःपुरकृतावासाय नमः।
ॐ ललनाजनसेविताय नमः।
ॐ भूपालदेहसम्प्राप्तनानाक्रीडामहोत्सवाय नमः।
ॐ विषयानन्दविमुखाय नमः।
ॐ विषयौघविनिन्दकाय नमः।
ॐ विषयारातिशमनाय नमः।
ॐ विषयातिविदूरधिये नमः।
ॐ विषयाख्यमहारण्यनिकृन्तनकुठारकाय नमः।
ॐ विषयाख्यविषज्वालासम्स्पर्शरहिताय नमः।
ॐ यमिने नमः।
ॐ विषयाम्बुधिसंशोषबडबाग्निशिखायिताय नमः।
ॐ कामक्रोधादिषड्वैरिदूरीभूतान्तरङ्गकाय नमः।
ॐ विषयासारतादर्शिने नमः॥७४०॥
ॐ विषयानाकुलांतराय नमः।
ॐ विषयाख्यगजव्रातदमनोद्युक्तकेसरिणे नमः।
ॐ विषयव्याघ्रदर्पघ्नाय नमः।
ॐ विषयव्यालवैद्यकाय नमः।
ॐ विषयौघदुरन्तत्वचिन्तकाय नमः।
ॐ वीतचापलाय नमः।
ॐ वात्सानयकलासारसर्वस्वग्रहणोत्सुकाय नमः।
ॐ भूपदेहकृतासंख्यभोगाय नमः।
ॐ नृपतिवेषभृते नमः।
ॐ समयात्ययसम्बोधिशिष्यवर्गानुचिन्तिताय नमः॥७५०॥
ॐ दुःखार्णवनिमग्नस्वशिष्यवर्गानुचिन्तकाय नमः।
ॐ इतिकर्तव्यतामूढशिष्यवर्गगवेषिताय नमः।
ॐ मृतोत्थियनृपश्रोतृशिष्याभिज्ञातधामकाय नमः।
ॐ नानारुचिरवेषाढ्यनिजशिष्यावलोकनाय नमः।
ॐ गानविद्यातिनैपुण्यशिष्यनागावकर्णनाय नमः।
ॐ अन्योपदेशरचितहृद्यपद्यसुसंश्रविणे नमः।
ॐ नानार्थगर्भशिष्योक्तपयार्थपरिचिन्तकाय नमः।
ॐ वेदान्तार्थपरिप्रोतवाक्यश्रवणकौतिकिने नमः।
ॐ तत्वमस्यादिशिष्योक्तवाक्यार्थपरिचिन्तकाय नमः।
ॐ सर्ववेदान्तसंगूढपरमात्मानुचिन्तकाय नमः।
ॐ निजशिष्याशयाभिज्ञाय नमः।
ॐ निजकायप्रवेशकृते नमः।
ॐ दंदह्यमानात्मदेहदर्शिने नमः।
ॐ त्वरितमानसाय नमः।
ॐ तदानीन्तनसन्तापशमनोपायचिन्तकाय नमः।
ॐ लक्ष्मीनृसिंहस्तवननिश्चितात्मने नमः।
ॐ सुपद्यकृते नमः।
ॐ नानास्तुतिवचोगुम्फप्रीणितश्रीनृसिंहकाय नमः।
ॐ नृसिंहकरुणाशान्तसन्तापवपुराश्रिताय नमः।
ॐ सनन्दनादिसच्छिष्यसंवृतोभयपार्श्वकाय नमः॥७७०॥
ॐ निजवृत्तान्तकथनतत्पराय नमः।
ॐ शिष्यभावविदे नमः।
ॐ आकाशमार्गगमनाय नमः।
ॐ मण्डनार्यनिवेशदृशे नमः।
ॐ विषयास्वादविमुखमण्डनार्याभिनन्दकाय नमः।
ॐ मण्डनार्यकृतासंख्यप्रणामाञ्जलिदानकाय नमः।
ॐ सन्यासनिश्चितस्वान्तमण्डनार्यप्रशंसकाय नमः।
ॐ विष्टरस्थितिविश्रान्ताय नमः।
ॐ शारदाकृतदर्शनाय नमः।
ॐ शारदाश्लाघितस्वीयसार्वज्ञ्याय नमः॥७८०॥
ॐ वादलोलुपाय नमः।
ॐ निजधामगमोद्युक्तवाण्यन्तर्धानदर्शकाय नमः।
ॐ योगमाहात्म्यसंदृष्टवाणीभाषणतत्पराय नमः।
ॐ विधिपत्नीत्वसंदर्शिने नमः।
ॐ तन्माहात्म्यानुदर्शकाय नमः।
ॐ स्वकल्पितर्ष्यशृङ्गादिक्षेत्रवासाभिकाङ्क्षकाय नमः।

ॐ शृङ्गगिर्यादिसुक्षेत्रसानिध्यप्रार्थनापराय नमः।
ॐ भारतीसमनुज्ञातक्षेत्रसानिध्यतोषिताय नमः।
ॐ अकस्मातन्तर्धिदर्शिने नमः॥७९०॥
ॐ विस्मयाकुलमानसाय नमः।
ॐ विधिवद्दत्तसर्वस्वमण्डनार्यानुमोदकाय नमः।
ॐ सन्न्यासगृह्यविध्युक्तसर्वकर्मोपदेशकाय नमः।
ॐ श्रीमन्मण्डनकर्णोक्तमहावाक्यचतुष्टयाय नमः।
ॐ महावाक्यगताशेषतत्वार्थश्रावकाय नमः।
ॐ गुरवे नमः।
ॐ तत्वम् पदगवाच्यार्थलक्ष्यार्थप्रतिपादकाय नमः।
ॐ लक्षोभयार्थैक्यबोधिने नमः।
ॐ नानादृष्टान्तदर्शकाय नमः।
ॐ देहाद्यहम्तामनतासमूलोन्मूलनक्रमाय नमः।
ॐ बृहदारण्यकप्रोक्तमहामत्स्यनिदर्शकाय नमः।
ॐ जाग्रदाद्यात्मसम्बन्धराहित्यप्रतिपादकाय नमः।
ॐ विवर्तवादसिद्धान्तसमर्थनपरायणाय नमः।
ॐ तात्पर्यलिङ्गनिर्णीतपरमाद्वैततत्वकाय नमः।
ॐ गुरुमाहात्म्यसंदर्शिने नमः।
ॐ तत्वविदे नमः।
ॐ तत्वबोधकाय नमः।
ॐ निजाङ्घ्रियुग्मपतितसुरेश्वरकटाक्षकृते नमः।
ॐ करुणालिङ्गितापाङ्गक्षपितान्तस्तमोमलाय नमः।
ॐ सुरेश्वराख्यासंदात्रे नमः॥८१०॥
ॐ सुरेश्वरसुपूजिताय नमः।
ॐ नर्मदातीरसंवासिने नमः।
ॐ श्रीशैलगमनोत्सुकाय नमः।
ॐ मल्लिकार्जुनसंदर्शिने नमः।
ॐ भ्रमराम्बाप्रणामकृते नमः।
ॐ माहेश्वरादिविजयिशिष्यवर्गसमाश्रिताय नमः।
ॐ अशेषदिक्प्रसृमरयशोज्योत्स्नानिशाकराय नमः।
ॐ निजमाहात्म्यसंश्रोतृकापालिककृतानतये नमः।
ॐ कापालिककृतानेकस्तुतिजालाय नमः।
ॐ निरादराय नमः॥८२०॥
ॐ कपालिप्रीणनार्थस्वगमनोक्तिसुसंश्रविणे नमः।
ॐ सर्वज्ञमस्तकापेक्षितदुक्तिपरिचिन्तकाय नमः।
ॐ निजसर्वज्ञतावाचिकापालोक्तिविचिन्तकाय नमः।
ॐ स्वशिरःप्रार्थनोद्युक्तकापालिककृतानतये नमः।
ॐ बह्वपायस्वीयकायदोषदर्शनतत्पराय नमः।
ॐ परोपकारनैरत्यव्रतपालनतत्पराय नमः।
ॐ निजकायापगमननिर्व्याकुलनिजान्तराय नमः।
ॐ समाधिकालीनशिरश्छेदानुज्ञाप्रदायकाय नमः।
ॐ एकान्तसंस्थिताय नमः।
ॐ योगिने नमः॥८३०॥
ॐ समाध्यालीनमानसाय नमः।
ॐ परमात्मानुसन्धाननिर्गताशेषचिन्तनाय नमः।
ॐ निष्कम्पदेहाय नमः।
ॐ निर्मोहाय नमः।
ॐ निरन्तरसुखात्मकाय नमः।
ॐ स्ववधोद्युक्तकापालिकागमनावबोधकाय नमः।
ॐ जत्रुप्रदेशनिहितचिबुकाय नमः।
ॐ दृष्टनासिकाय नमः।
ॐ सिद्धासनसमासीनाय नमः।
ॐ निर्गतद्वैतभावनाय नमः॥८४०॥
ॐ चिन्मात्रपरमानन्दलहरीमग्नमानसाय नमः।
ॐ कृपाणकरकापालिवधोद्योगानवेक्षकाय नमः।
ॐ ज्ञातवृत्तान्तपद्माङ्घ्रिमारितस्वीयशत्रुकाय नमः।
ॐ नृसिंहवेषपद्माङ्घ्रिकृतार्भटविचालिताय नमः।
ॐ समाधिव्युत्थितमतये नमः।
ॐ उन्मीलितविलोचनाय नमः।
ॐ तदट्टहासनिर्घोषबधिरीभूतकर्णकाय नमः।
ॐ दंष्ट्राकरालवदनश्रीमन्नृहरिदर्शकाय नमः।
ॐ आक्स्मिकनृसिंहावलोकनस्तिमितान्तराय नमः।
ॐ निर्भीताय नमः।
ॐ गलदानन्दभाष्पाय नमः।
ॐ स्तुतिपरायणाय नमः।
ॐ नृसिंहक्रोधशान्त्यर्थप्रार्थनातत्पराय नमः।
ॐ यतये नमः।
ॐ नृसिंहावेशसम्भ्रान्तपद्मपादप्रदर्शकाय नमः।
ॐ स्वप्रायितस्ववृत्तान्तज्ञातृपद्माङ्घ्रिप्रणताय नमः।
ॐ विस्मयाकुलाय नमः।
ॐ गोकर्णाभ्यर्णसञ्चारिणे नमः।
ॐ गोकर्णेश्वरपादाब्जप्रणन्त्रे नमः।
ॐ प्रीतमानसाय नमः।
ॐ गोकर्णनाथसम्स्तोत्रे नमः।

ॐ त्रिरात्रस्थितितत्पराय नमः।
ॐ मूकाम्बिकामहादेवीसन्दर्शनकृतार्थधिये नमः।
ॐ द्विजदम्पतिसन्दर्शिने नमः।
ॐ तद्रोदनविखिन्नधिये नमः।
ॐ तदङ्कगामिमृतकशिशुसन्दर्शनातुराय नमः।
ॐ अनङ्गवाणीसंश्रोत्रे नमः।
ॐ पुत्रोज्जीवनलालसाय नमः॥८७०॥
ॐ द्विजसंवर्णितस्वीयमहिमाय नमः।
ॐ सर्वपालकाय नमः।
ॐ तत्कालोत्थिततत्पुत्रजीवनप्रीतमानसाय नमः।
ॐ निजमाहात्म्यसन्द्रष्टृजनविस्मयकारकाय नमः।
ॐ मूकाम्बादर्शनाकाङ्क्षिणे नमः।
ॐ तत्क्षेत्रवासतत्पराय नमः।
ॐ उच्चावचगभीरार्थस्तोत्रनिर्माणकौतुकिने नमः।
ॐ स्वकर्मनिष्ठविप्राढ्यश्रीबलिग्रामसेवकाय नमः।
ॐ प्रभाकराख्यसद्विप्रबालमौग्ध्यापनोदकाय नमः।
ॐ स्वपादशरणायाततद्विप्रानुग्रहोत्सुकाय नमः॥८८०॥
ॐ प्रणामकर्तृतत्पुत्रसमुत्थापनतत्पराय नमः।
ॐ द्विजवर्णिततत्पुत्रमुग्धचेष्टावचःश्रविणे नमः।
ॐ अन्तःप्रच्छन्नवह्न्याभद्विजदारकदर्शनाय नमः।
ॐ तन्माहात्म्यविशेषज्ञाय नमः।
ॐ मौनमुद्राविभेदकाय नमः।
ॐ द्विजदारकसम्प्रश्नकरणोद्यतमानसाय नमः।
ॐ तदीयजडताहेतुपृच्छकाय नमः।
ॐ करुणाकराय नमः।
ॐ बालवेषप्रतिच्छन्नतदुक्तिश्रवणोत्सुकाय नमः।
ॐ देहादिजडताबोधिबालवाक्यातिविस्मिताय नमः॥८९०॥
ॐ स्वचेतनत्वसम्बोधितद्वचःश्लाघनापराय नमः।
ॐ पद्यद्वादशिकाकर्तृतत्प्रज्ञाश्लाघनोत्सुकाय नमः।
ॐ तत्त्वज्ञताप्रकटतदुक्तिप्रतिनन्दकाय नमः।
ॐ अध्यापनादिरहितबालप्रज्ञातिविस्मिताय नमः।
ॐ तदनुग्रहणोद्युक्ताय नमः।
ॐ तन्मूर्धन्यस्तहस्तकाय नमः।
ॐ गृहवासाद्ययोग्यत्वदर्शकाय नमः।
ॐ श्लाघनापराय नमः।
ॐ द्विजातिप्रेषणोद्युक्ताय नमः।
ॐ शिष्यसंग्रहणोद्युक्ताय नमः॥९००॥
ॐ हस्तामलकसंज्ञासन्द्रात्रे नमः।
ॐ न्यासदायकाय नमः।
ॐ स्वशिष्यभावानुगतहस्तामलकसंश्रिताय नमः।
ॐ श्रिङ्गगिर्याख्यसुक्षेत्रगमनोद्यतमानसाय नमः।
ॐ तुङ्गभद्राकृतस्नानाय नमः।
ॐ भाष्यप्रवचनोत्सुकाय नमः।
ॐ शारदालयनिर्मात्रे नमः।
ॐ शारदास्थापनापराय नमः।
ॐ शारदापूजनोद्युक्ताय नमः।
ॐ शारदेन्दुसमाननाय नमः॥९१०॥
ॐ गिर्याख्यनिजसच्छिष्यशुश्रूषाप्रीतमानसाय नमः।
ॐ पाठार्थसमुपाविष्टशिष्यमण्डलमण्डिताय नमः।
ॐ स्वशाटीक्षाळनोद्युक्तगिर्यागमननिरीक्षकाय नमः।
ॐ निजशिष्यान्तरासूयानिराकरणतत्पराय नमः।
ॐ गिर्याख्यनिजसच्छिष्यानुग्रहैकपरायणाय नमः।
ॐ स्वानुग्रहाप्तसर्वज्ञभावगिर्यभिनन्दिताय नमः।
ॐ विदिताखिलसद्विद्यागिर्यभिवन्दिताय नमः।
ॐ तोटकाभिदसद्वृत्तोज्वलपद्यावकर्णकाय नमः।
ॐ शिष्यान्तराभिविज्ञातकरुणालेशवैभवाय नमः।
ॐ गुर्वनुग्रहमाहात्म्यसन्दर्शिने नमः॥९२०॥
ॐ लोकसङ्ग्रहिणे नमः।
ॐ तोटकाख्याप्रदात्रे नमः।
ॐ श्रीतोटकार्यातिसत्कृताय नमः।
ॐ तत्वार्थगर्भतद्वाक्यशैलीवैभवचिन्तकाय नमः।
ॐ सुरेश्वरार्यपद्माङ्घ्रिहस्तामलकसंश्रिताय नमः।
ॐ तोटकानुगताय नमः।
ॐ शिष्यचतुष्टयसमाश्रिताय नमः।
ॐ सुरेश्वरापेक्षितस्वभाष्यवार्तिकनिर्मितये नमः।
ॐ वार्तिकारचनानुज्ञादात्रे नमः।
ॐ देशिकपुङ्गवाय नमः॥९३०॥
ॐ सिद्धान्तापगमाशङ्किपद्माङ्घ्र्यादिप्रबोधिताय नमः।
ॐ वार्तिकग्रंथनिर्माणजातविघ्नानुदर्शकाय नमः।
ॐ शिष्यनिर्बन्धानुगामिने नमः।
ॐ शिष्यौघकरुणाकराय नमः।
ॐ पद्माङ्घ्रिरचितस्वीयभाष्यटीकानिरीक्षकाय नमः।
ॐ रम्यनैष्कर्म्यसिद्ध्यादिसुरेशग्रंथदर्शकाय नमः।
ॐ आद्यन्तग्रंथसन्दर्भदर्शनप्रीतमानसाय नमः।

ॐ ग्रंथनिर्माणवैदग्ध्यदर्शनाधिकविस्मिताय नमः।
ॐ तैत्तरीयस्वीयभाष्यवृत्तिनिर्मापणोत्सुकाय नमः।
ॐ बृहदारण्यसद्भाष्यवार्तिकश्रवणादृताय नमः॥९४०॥
ॐ अनेकशिष्यरचिताद्वैतग्रंथावलोकनाय नमः।
ॐ तीर्थयात्राकृतोत्साहपद्मपादोक्तिचिन्तकाय नमः।
ॐ तीर्थयात्राभवानेकदोषसङ्घप्रदर्शकाय नमः।
ॐ नानाविक्षेपसाहस्रसम्भवप्रतिपादकाय नमः।
ॐ तीर्थयात्रैकनिर्बन्धपद्मपादानुमोदकाय नमः।
ॐ स्वोपदेशवचोऽश्रोतृपद्मपादानुशोचकाय नमः।
ॐ मार्गदोषादिसन्दर्शिने नमः।
ॐ जागरूकत्वबोधकाय नमः।
ॐ आसन्नमरणस्वीयजननीस्मरणातुराय नमः।
ॐ स्मृतिमात्रसमापन्नमातृपार्श्वाय नमः॥९५०॥
ॐ अतिभक्तिमते नमः।
ॐ मातृसन्दर्शनप्रीताय नमः।
ॐ प्रीणितस्वीयमातृकाय नमः।
ॐ स्वसम्स्कारैकसम्प्रार्थिमातृवाञ्छानुपालकाय नमः।
ॐ तारकाख्यपरब्रह्मोपदेष्ट्रे नमः।
ॐ परमेश्वराय नमः।
ॐ ब्रह्मानभिज्ञजननीसन्तारणपरायणाय नमः।
ॐ निजस्तोत्रसमायातपरमेशप्रदर्शकाय नमः।
ॐ जननीभयसन्द्रष्ट्रे नमः।
ॐ माधवस्तुतितत्पराय नमः॥९६०॥
ॐ स्तुतिमाहात्म्यसम्प्राप्तविष्णुमूर्तिप्रदर्शकाय नमः।
ॐ तद्दर्शनसमुत्पन्नजननीप्रीतिभाजनाय नमः।
ॐ विष्णुदूतविमानस्थमातृदर्शनविर्वृताय नमः।
ॐ तत्सम्स्कारकृतोद्योगाय नमः।
ॐ बन्धुवर्गसमाह्वायिने नमः।
ॐ सम्स्कारार्थाग्निसम्प्रार्थिने नमः।
ॐ बन्धुवर्गनिराकृताय नमः।
ॐ दक्षदोर्मथनप्राप्तवह्निसम्स्कृतमातृकाय नमः।
ॐ आग्र्यदातृस्वीयजनवेदबाह्यत्वशापकृते नमः।
ॐ यतिभिक्षाभाववाचिने नमः।
ॐ स्मशानीकृततद्गृहाय नमः।
ॐ पद्मपादागमकाङ्क्षिणे नमः।
ॐ तद्देशकृतवासकाय नमः।
ॐ महासुरालयेशानसन्दर्शनपरायणाय नमः।
ॐ शिष्यवर्गागमाभिज्ञाय नमः।
ॐ कुशलप्रश्नचोदकाय नमः।
ॐ पद्माङ्घ्रिबोधितस्वीयसर्ववृत्तान्तसंश्रविणे नमः।
ॐ पूर्वमातुलसन्दग्धतट्टीकोट्यनुशोचकाय नमः।
ॐ टीकालोपातिनिर्विण्णपद्मपादानुनायकाय नमः।
ॐ प्रज्ञामान्द्यकरात्युग्रगरदानोक्तिसंश्रविणे नमः॥९८०॥
ॐ निजपादाभिपतितपद्मपादानुकम्पनाय नमः।
ॐ पूर्वसंश्रुतटीकास्थपञ्चपाद्यनुचिन्तकाय नमः।
ॐ पञ्चपादीयगताशेषविषयप्रतिपादकाय नमः।
ॐ टीकालेखनसन्तुष्टपद्मपादातिपूजकाय नमः।
ॐ विस्मितस्वीयशिषौघसमभिष्टुतवैभवाय नमः।
ॐ नाटकापायदुःखार्तकेरळेशसमाधिकृते नमः।
ॐ यथोक्तनाटकाख्यानविस्मापितनरेश्वराय नमः।
ॐ सुधन्वराजसच्छिष्यसहिताय नमः।
ॐ विजयोज्वलाय नमः।
ॐ रामसेतुकृतस्नानाय नमः॥९९०॥
ॐ शाक्तौघविजयोत्साहाय नमः।
ॐ काञ्चीविदर्भकर्णातदेशसञ्चारनिर्वृताय नमः।
ॐ कापालिकौघविजयिने नमः।
ॐ नीलकण्ठजयोज्वलाय नमः।
ॐ गुप्ताभिचाराभिज्ञपद्माङ्घ्रिकृतसौख्यभाजे नमः।
ॐ गौडपादार्यसन्दर्शनानन्दाब्धिनिमग्नधिये नमः।
ॐ काश्मीरदेशविलसच्छारदापीथदर्शकाय नमः।
ॐ दक्षिणद्वारसंविष्टवादिव्रातजयोज्वलाय नमः।
ॐ विजयप्राप्तसर्वज्ञपीठारोहणकौतुकिने नमः।
ॐ देवताकृतसत्पुष्पवृष्टिसञ्छन्नमूर्तिकाय नमः।
ॐ कैलासशैलगमनपरमानन्दनिर्भराय नमः।
ॐ ब्रह्मादिरचिताह्वानाय नमः।
ॐ शिष्यवर्गकृतानतये नमः।
ॐ महोक्षारोहणोद्युक्ताय नमः।
ॐ पद्मजार्पितहस्तकाय नमः।
ॐ सर्वाभिलाषकरणनिरताय नमः।
ॐ निर्वृतान्तराय नमः।
ॐ श्री कैलासशैलगमनपरमानन्दनिर्भराय नमः।
ॐ श्रीमत्सद्गुरुपरप्रह्मणे नमः॥ॐ॥॥१००८॥

अन्तर्ध्वान्तनिवारणैकतरणिस्तापत्रयोग्रानल, ज्वालात्यन्तिकशामनैकजलदो दुःखाम्बुधेर्बाडवः।
प्रज्ञानन्दसुधाम्बुदेरुदयभाग्राकासुधादीधितिः , नित्यं शङ्करदेशिकेन्द्रयतिराट् हृद्योम्नि विद्योतताम्॥
भक्तजनहृत्तिमिरकर्तनविकर्तनान्, द्वन्द्वमुखदुःखविषसर्पगरुडोत्तमान्।
जन्ममृतिदुर्गतिमहार्णवघटोद्भवान् , शङ्करगुरूत्तमपदान् नमत सत्तमान्॥

*॥ इति श्रीमत् शङ्कराचार्यसहस्रनामावलिः ॥*

## ॥ तोटकाष्टकं ॥

विदिताखिलशास्त्रसुधाजलधे महितोपनिषत् कथितार्थनिधे ।

हृदये कलये विमलं चरणं भव शंकर देशिक मे शरणम् ॥ १॥

करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।

रचयाखिलदर्शनतत्त्वविदं भव शंकर देशिक मे शरणम् ॥ २॥

भवता जनता सुहिता भविता निजबोधविचारण चारुमते ।

कलयेश्वरजीवविवेकविदं भव शंकर देशिक मे शरणम् ॥ ३॥

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।

मम वारय मोहमहाजलधिं भव शंकर देशिक मे शरणम् ॥ ४॥

सुकृतेऽधिकृते बहुधा भवतो भविता समदर्शनलालसता ।

अतिदीनमिमं परिपालय मां भव शंकर देशिक मे शरणम् ॥ ५॥

जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः ।

अहिमांशुरिवात्र विभासि गुरो भव शंकर देशिक मे शरणम् ॥ ६॥

गुरुपुंगव पुंगवकेतन ते समतामयतां नहि कोऽपि सुधीः ।

शरणागतवत्सल तत्त्वनिधे भव शंकर देशिक मे शरणम् ॥ ७॥

विदिता न मया विशदैककला न च किंचन काञ्चनमस्ति गुरो ।

द्रुतमेव विधेहि कृपां सहजां भव शंकर देशिक मे शरणम् ॥ ८॥

*॥ इति श्रीमत्तोटकाचार्यविरचितं श्रीशङ्करदेशिकाष्टकं सम्पूर्णम् ॥*

## ॥श्रीशङ्कराचार्यभुजङ्गप्रयात-स्तोत्रम्॥

**(श्रीसच्चिदानन्द-शिवाभिनव-नृसिंह-भारती महास्वामिभिः श्रीकालटिक्षेत्रे विरचितं)**

कृपासागरायाशुकाव्यप्रदाय
प्रणम्राखिलाभीष्टसन्दायकाय ।
यतीन्द्रैरुपास्याङ्घ्रिपाथोरुहाय
प्रबोधप्रदात्रे नमः शङ्कराय ॥१॥

चिदानन्दरूपाय चिन्मुद्रिकोद्य-
त्करायेशपर्यायरूपाय तुभ्यम् ।
मुदा गीयमानाय वेदोत्तमाङ्गैः
श्रितानन्ददात्रे नमः शङ्कराय ॥२॥

जटाजूटमध्ये पुरा या सुराणां
धुनी साद्य कर्मन्दिरूपस्य शम्भोः
गले मल्लिकामालिकाव्याजतस्ते
विभातीति मन्ये गुरो किं तथैव ॥३॥

नखेन्दुप्रभाधूतनम्रालिहार्दा-
न्धकारव्रजायाब्जमन्दस्मिताय ।
महामोहपाथोनिधेर्बाडबाय
प्रशान्ताय कुर्मो नमः शङ्कराय ॥४॥

प्रणम्रान्तरङ्गाब्जबोधप्रदात्रे
दिवारात्रमव्याहतोस्राय कामम् ।
क्षपेशाय चित्राय लक्ष्म क्षयाभ्यां
विहीनाय कुर्मो नमः शङ्कराय ॥५॥

प्रणम्रास्यपाथोजमोदप्रदात्रे
सदान्तस्तमस्तोमसंहारकर्त्रे ।
रजन्या मपीद्धप्रकाशाय कुर्मो
ह्यपूर्वाय पूष्णे नमः शङ्कराय ॥६॥

नतानां हृदब्जानि फुल्लानि शीघ्रं
करोम्याशु योगप्रदानेन नूनम् ।
प्रबोधाय चेत्थं सरोजानि धत्से
प्रफुल्लानि किं भो गुरो ब्रूहि मह्यम् ॥७॥

प्रभाधूतचन्द्रायुतायाखिलेष्ट-
प्रदायानतानां समूहाय शीघ्रम्।
प्रतीपाय नम्रौघदुःखाघपङ्क्ते-
र्मुदा सर्वदा स्यान्नमः शङ्कराय ॥८॥

विनिष्कासितानीश तत्त्वावबोधा -
न्नतानां मनोभ्यो ह्यनन्याश्रयाणि ।
रजांसि प्रपन्नानि पादाम्बुजातं
गुरो रक्तवस्त्रापदेशाद्बिभर्षि ॥९॥

मतेर्वेदशीर्षाध्वसम्प्रापकाया-
नतानां जनानां कृपार्द्रैः कटाक्षैः ।
ततेः पापबृन्दस्य शीघ्रं निहन्त्रे
स्मितास्याय कुर्मो नमः शङ्कराय ॥१०॥

सुपर्वोक्तिगन्धेन हीनाय तूर्णं
पुरा तोटकायाखिलज्ञानदात्रे।
प्रवालीयगर्वापहारस्य कर्त्रे
पदाब्जम्रदिम्ना नमः शङ्कराय ॥११॥

भवाम्भोधिमग्नान्जनान्दुःखयुक्तान्
जवादुद्दिधीर्षुर्भवानित्यहोऽहम् ।
विदित्वा हि ते कीर्तिमन्यादृशाम्भो
सुखं निर्विशङ्कः स्वपिम्यस्तयत्नः ॥१२॥

*॥ इति श्रीशङ्कराचार्य-भुजङ्गप्रयातस्तोत्रम्॥*

# ॥ श्रीमज्जगद्गुरुशङ्करभगवत्पूज्यपादाचार्यस्तवः ॥

**(श्रीभारतीतीर्थमहास्वामिभिः विरचितम्)**

मुदा करेण पुस्तकं दधानमीशरूपिणं तथाऽपरेण मुद्रिकां नमत्तमोविनाशिनीम् ।
कुसुम्भवाससावृतं विभूतिभासिफालकं नताघनाशने रतं नमामि शङ्करं गुरुम् ॥ १॥
पराशरात्मजप्रियं पवित्रितक्षमातलं पुराणसारवेदिनं सनन्दनादिसेवितम् ।
प्रसन्नवक्त्रपङ्कजं प्रपन्नलोकरक्षकं प्रकाशिताद्वितीयतत्त्वमाश्रयामि देशिकम् ॥ २॥
सुधांशुशेखारार्चकं सुधीन्द्रसेव्यपादुकं सुतादिमोहनाशकं सुशान्तिदान्तिदायकम् ।
समस्तवेदपारगं सहस्रसूर्यभासुरं समाहिताखिलेन्द्रियं सदा भजामि शङ्करम् ॥ ३॥
यमीन्द्रचक्रवर्तिनं यमादियोगवेदिनं यथार्थतत्त्वबोधकं यमान्तकात्मजार्चकम् ।
यमेव मुक्तिकाङ्क्षया समाश्रयन्ति सज्जना नमाम्यहं सदा गुरुं तमेव शङ्कराभिधम् ॥ ४॥
स्वबाल्य एव निर्भरं य आत्मनो दयालुतां दरिद्रविप्रमन्दिरे सुवर्णवृष्टिमानयन् ।
प्रदर्श्य विस्मयाम्बुधौ न्यमज्जयत् समान् जनान् स एव शङ्करः सदा जगद्गुरुर्गतिर्मम ॥ ५॥
यदीयपुण्यजन्मना प्रसिद्धिमाप कालटी यदीयशिष्यतां व्रजन् स तोटकोऽपि पप्रथे ।
य एव सर्वदेहिनां विमुक्तिमार्गदर्शको नराकृतिं सदाशिवं तमाश्रयामि सद्गुरुम् ॥ ६॥
सनातनस्य वर्त्मनः सदैव पालनाय यः चतुर्दिशासु सन्मठान् चकार लोकविश्रुतान् ।
विभाण्डकात्मजाश्रमादिसुस्थलेषु पावनान् तमेव लोकशङ्करं नमामि शङ्करं गुरुम् ॥ ७॥
यदीयहस्तवारिजातसुप्रतिष्ठिता सती प्रसिद्धशृङ्गभूधरे सदा प्रशान्तिभासुरे ।
स्वभक्तपालनव्रता विराजते हि शारदा स शङ्करः कृपानिधिः करोतु मामनेनसम् ॥ ८॥
इमं स्तवं जगद्गुरोर्गुणानुवर्णनात्मकं समादरेण यः पठेदनन्यभक्तिसंयुतः ।
समाप्नुयात् समीहितं मनोरथं नरोऽचिरात् दयानिधेः स शङ्करस्य सद्गुरोः प्रसादतः ॥ ९॥

*॥ इति शङ्करभगवत्पूज्यपादाचार्यस्तवः सम्पूर्णम् ॥*


"ब्रह्मसत्यं जगत्मिथ्या , जीवो ब्रह्मैव नापरः"

